धूमादिमत्यादौ हेतुनिष्ठसाध्याभाववद्वृत्तित्वत्व विशिष्टनिरूपितविषयिताव्यधिकरणधर्मावच्छिन्नाभा
ववद्वृत्तिविषयितैवमाचनवन्ह्यनुमितिप्रतिबंधकतावच्छेदिका तच्छालिज्ञानस्यानुमित्यप्रतिबंधका-
त्वात् व्यभिचारिणि साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वविषयीतापि तादृशी तज्ज्ञानस्य व्य
भिचारज्ञानविधयानुमितिप्रतिबंधकत्वात् तादृशविषयितायाऽनुमितिप्रतिबंधकतावच्छेदकत्वा
न्नातिव्याप्तिः साध्याभाववद्वृत्तित्वरूपविषयस्य प्रतिबंधकतावच्छेदककोट्यप्रवेशाद् इति व्याप्तिः अ
तो विषयितापर्यंतनिवेशनं हेतुनिष्ठसाध्याभाववद्वृत्तितात्व विशिष्टे प्रतिबंधकतावच्छेदकविष
यतापर्याप्त्यभावोक्तौ साध्यप्रतियोगिकाभावमात्रनिवेशे व्यभिचारिण्यतिव्याप्तिः प्रतियोगितायां साध्य
तावच्छेदकावच्छिन्नत्वावगाहिन एतज्ज्ञानस्यानुमितिविरोधितया तद्घटितविषये प्रतिबंधकतावच्छेदका-
विषयतायाः पर्याप्तेः साध्यतावच्छेदकावच्छिन्नाभावनिवेशेव्यसद्धेतौ हेतुनिष्ठतादृशवृत्तित्वाप्रसिद्धेर्न।

१५ संभवतीति तदुपेक्ष्य विषयितायां तादृशावच्छेदकतापर्याप्त्यभावो निवेशितः यन्निष्ठत्वानुपादाने
धूमाद्यंशे वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वावगाहिभ्रमनिष्ठविशिष्टनिरूपितविषयितायाअपि
अनुमितिप्रतिबंधकतावच्छेदकत्वाद्वह्निमान् धूमादित्यादावव्याप्तिरतस्तदुपादानं तथाच भ्रम
विषयवह्न्यभाववद्वृत्तित्वस्य हेतुनिष्ठत्वाभावान्न दोषः यन्निष्ठपदार्थनिरूपितविषयितासामान्ये
यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्ये इति वा यद्युच्यते तदा अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्ति
त्वमेव यत्र सामानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन भानं तादृशज्ञानीयहेतुनिष्ठतथाविधसाध्याभा
ववद्वृत्तित्वविषयितायाअनुमितिप्रतिबंधकतावच्छेदकत्वात्संभवो व्याप्तिर्वेति साध्याभाववद्वृत्तित्वविशिष्टनिरू
पितत्वं विषयिताविशेषणं तादृशभ्रमविषयितावत्साध्याभाववद्वृत्तित्वविशिष्टनिरूपिता तादृशविषयितानिरू १५
पकस्य अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य विशेषणीभूतं यत्समानाधिकरणधर्मावच्छिन्नसाध्याभावव

वृत्तित्वत्वं तद्विशिष्टत्वाभावात् नन्वतद्विशिष्टनिरूपितत्वं यदि तदवच्छिन्ननिरूपकताकत्वं तदा समानाधि
करणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वस्य तद्रूपविषयवृत्तावसत्त्वेऽपि तन्निष्ठविषयतानिरूपकत्वस्याधिक
रणीभूयावच्छेदकत्वात् भ्रमविषयितायास्तद्विशिष्टनिरूपितत्वमक्षतमेव यदि च वस्तुगत्या यत्र तद्वैशिष्ट्यं त
न्निरूपितत्वमेव विशिष्टनिरूपितत्वं तदा समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वमेवो
क्तभ्रमविषयितायां अक्षतमेवेति कथं तस्या वृत्तिरिति वाच्यं विशेषणीभूतधर्मान्तरविशिष्टेन व्यावृत्तिमान
स्य विशेष्यस्य भाने विशेषणांशे प्रकारीभवन्त्यां विशेष्यसंबंधितावच्छेदकतायाः भानात् साध्याभाववद्वृत्ति
त्वत्वरूपविशेषणेन निरूपकीभूय विषयिताव्यावर्त्तने व्यावर्त्तकविभ्रमकोटौ विषयस्य आश्रयतया व्यावर्त्तकं च
साध्याभाववद्वृत्तितात्वं तस्यापि निरूपकतावच्छेदकीभूय विषयिताव्यावर्त्तकत्वादुक्तविषयिताया वृत्तिः तद्व्या
वर्त्तकविषयाया व्यावर्त्तकस्य तन्निष्ठसाध्याभाववद्वृत्तितात्वस्य तादृशविषयतानिरूपकतानवच्छेदकत्वादिति।

९६ ताद्दशविषयितायालक्षणाघटकत्वात् एवंचोक्तभ्रमविषयतावच्छेदकतयैवसाध्याभाववत्त्वस्यसार्थक्यंता
दृशविषयितायाउक्तक्रमेणहेतुनिष्ठसाध्याभाववद्वृत्तित्वविशिष्टनिरूपितत्वेहेतुनिष्ठाधेयतात्वविशिष्टनि
रूपितत्वानपायात् साध्याभावमनुपादायाधिकरणवृत्तितात्वविशिष्टविषयितानिवेशनेतुसमानासमाना
धिकरणधर्मावच्छिन्नाभावाधिकरणीयत्वभ्रमविषयितावारणेपिवृत्तिविशेषणेतन्निरूपकेधिकरणेसा
मानाधिकरणधर्मावच्छिन्नाभावभ्रमविषयितावारणसंभवात् साध्याभावांशस्यांशनिवेशस्यापिसार्थक्या
त् नचतावत्पर्यंतनिवेशेपिवह्नित्वावच्छिन्नप्रतियोगिकत्वेनव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभा
वमवगाह्यताद्दशाभाववृत्तित्वावगाहियद्ज्ञानंतदीयताद्दशसाध्याभाववद्वृत्तित्वविषयितायांसाध्याभावव
द्वृत्तित्वविशिष्टनिरूपितत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकायः साध्याभाववत्तद्वृत्तित्वतस्यैवतत्रविशे ९६
षणतयाभानात् तद्विशिष्टत्वस्यचताद्दशज्ञाननिष्ठविषयितानिरूपकसाध्याभाववद्वृत्तित्वेसत्त्वात् इति तद्दो

पत्तादव्याप्यमितिवाच्यं अभावांशे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन साध्यप्रकारकंव्यभिचारज्ञा
नमेवानुमितिविरोधि यत्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगि
ताकत्वसंबंधेन साध्यप्रकारस्तादृशज्ञानविषयघटकस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन सा
ध्यविशिष्टस्य व्यधिकरणधर्मावच्छिन्नाभावस्याप्रसिद्ध्या तादृशज्ञानविषयितायाविशिष्टनिरूपकत्वासंभवात्
नन्वेवं समानाधिकरणधर्मावच्छिन्नसाध्याभाववद्विशेषिताधिकरणवृत्तित्वावगाहिनः समानाधिकरणध
र्मावच्छिन्नाभावांशेऽभ्रमरूपज्ञानस्य विषयितायाः अधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशिष्टनिरू
पितत्वात्समानाधिकरणधर्मावच्छिन्नसाध्याभावविषयितानिरूपिताधिकरणविषयितानिरूपिताधेयत्वावि
षयितात्वेनत्वप्रतिबंधकतावच्छेदकत्वादव्याप्तिरिति वाच्यं हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशि
ष्टनिरूपितविषयितायां प्रतिबंधकतावच्छेदकत्वाभावस्य विवक्षणीयत्वात् उक्तभ्रमे त्वसमानाधिकरणध

र्मावछिन्नाभावविषयितायास्ताहशविशिष्टनिरूपितत्वाभावेनतस्याएवच्चप्रतिबंधकतावछेदकत्वाद्व्याप्तेः। ना
मितिवाच्यं हेतुसामानाधिकरण्यविशिष्टसाध्याभावत्वविशिष्टनिरूपितविषयितायांप्रतिबंधकतावछेदको
भावस्यविवक्षणीयत्वात्तेनवकाशात् अथयत्रत्तानेहेतुसमानाधिकरणतयाभासमानेअधिकरणध
र्मावछिन्नाभावेअधिकरणधर्मावछिन्नप्रतियोगिताकत्वसाध्यतावछेदकावछिन्नप्रतियोगिताकत्वोभयः
संबंधेनसाध्यस्यैकाप्रकारतातादृशत्तानीयअधिकरणधर्मावछिन्नाभावीयविषयितायासाध्यतावछेदकाव
छिन्नप्रतियोगिताकत्वोभयसंबंधेनसाध्यस्यैकाप्रकारतातादृशज्ञानीयअधिकरणधर्मावछिन्नाभावीयवि
षयितायांसाध्यतावछेदकावछिन्नप्रतियोगिताकत्वसंबंधेनसाध्यविशिष्टाभावनिरूपितत्वस्यविषयभवद्
भावेसाध्यतावछेदकावछिन्नप्रतियोगिताकत्व।सत्वेनासंभवेपिअधिकरणधर्मावछिन्नप्रतियोगिताकत्व ९७
संबंधेनसाध्यविशिष्टाभावनिरूपितत्वस्यसाध्यतावछेदकावछिन्नप्रतियोगिताकत्वासत्वेनासंभवेपिअ

धिकरणधर्मावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यविशिष्टाभावनिरूपितत्वस्यसाध्यतावच्छेदकावच्छिन्न
प्रतियोगिताकत्वसंबंधविषयितानिरूपकविषयितात्वेनानुमितिप्रतिबंधकत्वस्यचावश्यकत्वात्अव्याप्तिर्दुर्वा
रैवेतिचेत् न तादृशाभावस्याप्रामाणिकत्वात् प्रामाणिकत्वेच संसर्गीयविषयताद्वयानिरूपकत्वेनाभाव
विषयताविशेषणीयतयासामंजस्यात् अथसाध्यरूपविशेषणाविशिष्टस्याभावस्यविषयितानिरूपकत्वा
क. पाश्रयणेघटत्वसाध्याभावयोःसंबंधस्यसंबंधविधयालक्षणघटकत्वमावश्यकंसचसंबंधःसाध्यतावच्छेदका
वच्छिन्नप्रतियोगिताकत्वरूपोप्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वरूपश्चाननुगतइतिप्रथमस्यनि
वेशेकेवलान्वयिनिसाध्यविशेषिताभावस्यैवाप्रसिद्धिः व्यतिरेकिसाध्यकहेतौचतादृशहेतुसमानाधिक
रि रणाभावाप्रसिद्धिरसंभवः चरमस्यनिवेशेचसर्वत्रमतिव्याप्तिरेवेतिव्याप्तिः प्रतियोगितावच्छेदकधर्माणां
चोपलक्षणीभूतेनकेनचिद्रूपेणानुगमय्यनिवेशोनसंभवतिप्रतियोगितावच्छेदकोपलक्षणस्यसंबंधघटक

९८ तथाभानात् नचावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगिताया एव संबंधतया निवेशान्नाननुगमं निबं
धनो दोष इति वाच्यम् अवच्छेदकावच्छिन्नत्वाविशेषितस्य प्रतियोगिताविषयकाभावज्ञानस्य प्रतियोगिम
ज्ज्ञानाविरोधितया तज्ज्ञानाविरोधिनः प्रतियोगिविशेषिताभावज्ञानस्य चानुभवविरुद्धतयावच्छेदकावच्छि
न्नत्वाविशेषितप्रतियोगितायाः संसर्गतयाभानात् नच स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यताव
च्छेदकविशेषित एवाभावो निवेश्यः ननु साध्यविशेषितः वह्नित्वादिना घटाद्यभाव एव वन्ह्यादिसाध्यकधू
मादिहेतुकस्थले लक्षणघटक इति वाच्यं प्रमेयत्वाद्यवच्छिन्नसाध्यकस्थले तादृशाभावाप्रसिद्धेः एवं स्वा
वच्छिन्नप्रतियोगिताकत्वसंबंधेन वन्हित्वादिविशेषिते वन्हित्वेन घटादेरभावे भासमाने यत्र संबंधघटक
प्रतियोगितायां बाधितस्य वन्ह्यादिनिष्ठत्वस्य भानं तादृशज्ञानीयाभावविषयितया उक्तसंबंधेन साध्य
तावच्छेदकविशिष्टाभावनिरूपितया तेनुमितिविरोधितया चानुपपत्तेर्दुर्वारत्वात् स्वावच्छिन्नसाध्यवृत्ति ९८

त्वविशिष्टप्रतियोगितानिवेशे त्वसर्वत्रसद्धेतावप्रसिद्धिः एवंप्रतियोगिविशेष्यतापन्नएवाभावेप्रति
योगिपारतन्त्र्येणसमानाधिकरणधर्मस्यस्वातन्त्र्येणाधिकरणधर्मस्यवावच्छिन्नप्रतियोगिताकत्वसं
बंधेनप्रकारत्वंप्रामाणिकंनतुप्रतियोगिविशेष्यतानापन्नेववह्निर्नास्तीतिवह्नित्वेनघटोनास्तीत्येवप्रती
तेः नतुवह्नित्वेननास्तीति तथाचविशेष्यप्रतियोग्यविशेषितस्योक्तसंबंधेनसाध्यतावच्छेदकविशे
षितस्याभावस्यविषयित्वनिरूपकतयानिवेशोनसंभवत्येवेतिचेन्नैवं प्रतियोग्यादिविशेषिताभावीय
त्वेनविशिष्टनिरूपितविषयितालक्षणेननिवेश्यतेऽपितुस्वनिरूपकहेतुसमानाधिकरणाभावनिष्ठो
यः संबंधस्तत्प्रतियोगिसाध्यनिष्ठतत्संबंधावच्छिन्ननिरूपकतावच्छेदकताकत्वेनयत्रहेतुसमानाधिक
रणघटत्वावच्छिन्नवह्न्याद्यभावोवह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबंधेनवह्न्यादेःसाध्यस्यप्रकार
ताताद्दशज्ञाननविषयितानिरूपकाभावनिष्ठोननिरुक्ततन्निरूपकतावच्छेदकसंबंधइतितद्विषयिता

प्युदासः यत्र वन्हित्वावछिन्नघटाभावे तन्निष्ठवन्हित्वावछिन्नप्रतियोगिताकत्वमेव वन्हेः संबंधतयाभासते
तत्र तत्संबंधप्रतियोगी न वन्हिरपितु घट एवेति साध्यवत्त्ववतत्संबंधप्रतियोगीत्वनिवेशात्तादृशज्ञानीयाभाव
विषयेणाप्युदासः साध्यनिवेशाद्यत्र वन्हित्वेन घट एव वन्हित्वावछिन्नप्रतियोगिताकत्वसंबंधेन तत्संबंधानुयोगि
नि वन्हित्वावछिन्नप्रतियोगिताकघटाभावे प्रकारता तादृशज्ञानीयाभावविषयितायास्तत्संबंधप्रतियोग्यवछिन्नत्वनि
रूपकताकत्वेप्यनुमितिविरोधित्वेपि च न दोषः यत्र घटत्वांसंसर्गकोटौ भ्रमानंगीकारात् वन्ह्यभावे घटत्वावछि वछिन्न
न्नप्रतियोगिताकत्वमेव वन्हित्वावछिन्नप्रतियोगिताकत्वेन वन्हेः संसर्गतयाभासते तादृशज्ञानस्य प्रामाणि
कत्वे साध्यप्रतियोगिको हेतुसमानाधिकरणाभावानुयोगिको यद्धर्मावछिन्नप्रतियोगिताकत्वसंबंधस्तद्धर्मा
वछिन्नप्रतियोगिताकत्वत्वविशिष्टसंबंधावछिन्नसाध्यतानिरूपकतावछेदकताकत्वं विवक्षणीयमिति दि ९९
क् व्यधिकरणधर्मावछिन्नाभाववद्वृत्तित्वविषयितायां प्रतिबंधकतावछेदकत्वाभावादतिव्याप्तिरतः सामा

न्येऽस्तूक्तं प्रकृतानुमितिपदं प्रकृतानुमितिसामान्यपरमन्यथाव्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्ति
त्वाभावविषयकसमूहालंबनात्मकप्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वस्य हेतुनिष्ठताद्दशसाध्याभा
ववद्वृत्तित्वविषयितायामपि सत्वात् सद्धेतावतिलक्षणगमनासंभवात् एवं प्रकृतेत्यनुपादाने कामिनीजिज्ञा
सादेरप्रसिद्ध्यानुमितिसामान्यप्रतिबंधकतातदवच्छेदकत्वाभावो धूमाभाववद्वृत्तित्वादिविषयतायामक्ष
तएव तद्विषयकज्ञानस्याप्यन्यलिंगकान्यसाध्यकान्यसंसर्गकानुमित्यप्रतिँविषयितायाऽनुमितिप्रतिबंध
कस्वरूपासिद्ध्यादिज्ञानवृत्तित्वादसंभवःस्यादतो यन्निष्ठसाध्याभाववद्वृत्तित्वविषयकज्ञानसामान्यस्यानु
मित्यप्रतिबंधकत्वरूपवैरूप्यनिरुक्तविषयितासामान्येऽनुमितिप्रतिबंधकतावच्छेदकत्वाभावपर्यंतानुधाव
नं अवच्छेदकत्वं च स्वरूपसंबंधविशेषः न च धूमाभाववद्वृत्तित्वेन घटादिविषयकज्ञानस्यानुमितिप्रतिबंध
कत्वाभावपर्यंतानुधावनं अवच्छेदकत्वं च तया धूमाभाववद्वृत्तित्वत्वविशिष्टविषयेमात्रावलिज्ञानत्वेन प्रति

+ बंधकत्वात् अत: प्रकृतेति तत्साध्यतद्धेतुकतत्संसर्गकपरं। समभेदानु। नव्यव्यधिकरणधर्मावच्छि
न्नाभाववद्वृत्तित + ५

गदा ×बंधकतया साध्याभाववद्वृत्तित्वज्ञानस्यानुमितिजनकताभावः अतिप्रसंगादिति हेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नप्रति×८

१०० बंधकताकत्वेनस्यासंभवात्तादृशविषयितयाप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्वासत्वेना
तिव्याप्तिरितिवाच्यं धूमाभाववद्वृत्तित्वत्वप्रकारितानिरूपितविषयिताशालिज्ञानत्वेनभ्रमसाधारणप्रति
बंधकताकत्वेनासंभवात् तादृशविषयितायेनत्वेवधूमाभाववद्वृत्तित्वत्वविशिष्टनिरूपितविषयितायाःप्र
तिबंधकत्वस्याक्षतत्वात् नन्वमणिवारज्ञानस्यानुमितिकारणव्याप्तिज्ञानं प्रत्येवप्रतिबंधकत्वादनुमितिप्रति
बंधकत्वमितिमणिवारिएयतिव्याप्तिरितिवाच्यं तज्जनकज्ञानप्रतिबंधकतावच्छेदकत्वाभावस्यैवविवक्षि
तत्वात् अनुमित्यविरोधित्वज्ञानस्य अनुमितिप्रतिबंधकतावच्छेदकत्वाभावप्रकारकज्ञानस्यैव अनुमिति
हेतुत्वे इति एतन्मतेनिरुक्तविषयितानिष्ठतादृशावच्छेदकत्वाभावघटितस्यैवानुमितिकारणीभूतज्ञानवि
षयत्वादितिभावः अनुमित्यविरोधितया अनुमितिजनकज्ञानाप्रतियोगिताकाभाववद्वृत्तित्वविषयितासा^
मान्येतुमितिजनकज्ञानप्रतिबंधकतादृशज्ञानीयहेतुनिष्ठसाध्याभाववद्वृत्तित्वज्ञानीयविषयितायाञपि १०
×वच्छेदकत्वाभावस्याक्षतत्वादितिभावः नन्वहेतुनिष्ठसाध्याभाववद्वृत्तित्वविषयितानुमितिप्रतिबंधकतावच्छेदिकाइत्येता×१

तादृशविषयितासामान्यांतर्गततया तत्र च प्रकृतव्याप्तिज्ञानप्रतिबंधकतावच्छेदकत्वस्यापि सत्त्वेनातिव्या
प्तेनवकाश इति वाच्यं एवं सति सद्धेतावपि हेतुनिष्ठअधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वेऽनुमितिप्रतिबंधक
तावच्छेदकत्वस्वमनिष्ठातादृशसाध्याभाववद्वृत्तित्वविषयितायांअनुमितिप्रतिबंधकतावच्छेदकत्वसत्त्वेनल
क्षणगमनासंभवादितरविशेषत्वेनतादृशविषयितायाएवलक्षणेनिवेशनतयाविषयिताविशेष त्वेनसा
ध्याभाववद्वृत्तित्वविषयितायाःप्रतिबंधकतावच्छेदकत्वेनातिव्याप्तिवारणासंभवादितिध्येयम् मिश्ररी
त्यासाजात्यघटनेनसाध्याभाववद्वृत्तित्वरूपांव्याप्तिंपरिष्कृत्योपन्यस्यति यावंत इति धूमवान्वह्नेरित्या
दौ अधिकरणधर्मावच्छिन्नाभावसजातीयस्य घटत्वादिनातदधिकरणवृत्तित्वाभावस्यहेतौसत्त्वादतिव्याप्तिर
तो यावंत इति तथा च यावदंतर्गतसमानाधिकरणधर्मावच्छिन्नाभावसजातीयस्यतदधिकरणवृत्तित्वाभाव
स्यहेतावसत्त्वान्नातिव्याप्तिः तत्रैवसमानाधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वस्यअधिकरणध

र्मावच्छिन्नाभावमादायातिव्याप्तिवारणायप्रत्येकंतत्तज्जातीया इति तथाचवक्ष्यमाणरूपेणाधिकरणधर्मा
वच्छिन्नसाध्याभाववृत्तित्वाभावस्यसमानाधिकरणधर्मावच्छिन्नसाध्याभावसजातीयत्वाभावान्नदोषः या
वत्साध्याभावत्वेनसाध्याभावानांनिरूपकतयासाजात्येऽन्वयव्यतिरेकिसाध्यकेवह्निमान्धूमादित्यादौयावत्सा
ध्याभावनिरूपितत्वस्यक्वचिदपिसाजात्येसत्त्वाद्यावत्साध्याभावसाजात्याप्रसिद्ध्याव्याप्तिरतस्तत्तद्व्यक्तित्वेनते
षांसाजात्येऽन्वयत्वाभावः तत्तदिति तत्तत्सजातीया इत्यनेनोपस्थितानांसमानाधिकरणव्यधिकरणधर्मावच्छि
न्नाभावसजातीयानांएकस्मिन्नधिकरणेवृत्तित्वाभावेएकत्रद्वयमितिरीत्यान्वयेतुनव्यतिरेकिसाध्यकेऽ
व्याप्तिः एकत्रोभयसाजात्याभावादतएकैकाभावेएकैकाभावसजातीयाभेदान्वयउपगंतव्यएतदर्थतास
र्य्याद्कंइत्येकमितिप्रथमाबहुवचनान्तंतत्तदधिकरणवृत्तित्वाभावाद्वयस्यविशेषणं यावत्साध्याभाव १०२
त्वेनसाध्याभावानामधिकरणोऽन्वयेवह्निमान्धूमादित्यादौतत्तद्ध्रदावृत्तित्वावच्छिन्नसाध्याभावघटितसमुदा

२ धर्मावच्छिन्नायाया प्रतियोगितातन्निरूपकत्वमेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमिह विवक्षितो तत्र साध्याभावतद्वृत्तित्वप २

याधिकरणतयाः क्वचिदप्यसत्वेनाप्रसिद्धिः स्यात्तस्तत्तद्व्यक्तित्वेन साध्याभावानामधिकरणे न यत्नाभायवर मंतत्तदिति तत्वमिति अप्यनिवरितत्वमित्यर्थः ननु तत्सजातीयत्वं तत्रवृत्तिधर्मवत्वं तथाच समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तिसभावत्वादिधर्मवत्वं व्यधिकरधर्मावच्छिन्नाभावेपि वर्त्तत इति तस्यापि तत्सजातीयत्वाद्व्यनिवारिण्यतिव्याप्तिरत आह साजात्यंचेति समानाधिकरणेति सामानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेणेत्यर्थः तृतीयार्थश्च भेदस्तस्य चसजात्येन्वयः विवक्षणीय इति विशेषः तथाच तत्र तत्सजातीयाद्यन्यस्य तत्तदभाववृत्तित्वादृशान्यतररूपवंत इत्यर्थः यद्यपि वन्हित्वावच्छिन्नाभावनिष्ठं स्वसमानाधिकरणधर्मावच्छिन्नो या याप्रतियोगिता तन्निरूपकत्वं स्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं स्वसमानाधिकरणवृत्तित्वाभावोभयसाधारणमेव समनियताभावे कामते न स्वाधिकरणावृत्तिधर्मावच्छिन्नाया प्रतियोगिता तन्निरूपकत्वरूपोव्यधिकरणधर्मावच्छि

भावितमेव तथा विस्वासमानाधिकरणधर्मावच्छिन्ना २

२ प्रतियोगिताकत्वं स्वसमानाधिकरणवह्नित्वावच्छिन्नप्रतियोगिताकत्वरूपं तथा तदधिकरणवृत्तित्वाभावेऽसं

१०२ न्नप्रतियोगिताकत्वेपस्य यथाश्रुतार्थएवादरणीयः तन्मतेऽधिकरणधर्मावच्छिन्नासाध्याभाववद्वृत्तित्वा
भावयोरैक्यात्तादृशसाध्याभावस्य ·दृशप्रतियोगितानिरूपकत्वं तादृशप्रतियोगितानिरूपकत्वस्यतथावि
धतद्वृत्तित्वाभावेपिसत्त्वात् एतेनसमनियताभावैक्यमतेऽधिकरणधर्मावच्छिन्नाभावस्यसमवायादिसंबं
धावच्छिन्नगगनत्वाद्यवच्छिन्नगगनाद्यभावाभिन्नतया तस्य समानाधिकरणधर्मावच्छिन्नगगनादिनिष्ठ
प्रतियोगितानिरूपकत्वात्सधिकरणधर्मावच्छिन्नाभावस्यनिरुक्तरूपवत्त्वानुपपत्त्यास्वसमानाधिकर
णधर्मावच्छिन्नसमानाधिकरणसंबंधावच्छिन्नप्रतियोगितानिरूपकत्वपर्यंतनिवेशनायामेनोपादे
यः समनियताभावैक्यमतेगगनाभावत्वगगनाभावभिन्नत्वान्यतररूपेणापिसाध्यतायाविवक्षणेसंभ
वतीतिध्येयम् ननुयावत्साध्याभावांतर्गतानां तत्तत्साध्यवत्प्रत्ययवादीनामधिकरणेहेतोर्वृत्तावह्निमा १०२
न्धूमादित्यादावव्याप्तिरतआह साध्याभाववत्वेति द्वितीयरीत्येति यत्समानाधिकरणानामित्यादिद्विती

यल्लक्षणेरीत्येत्यर्थः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताभोकोव एव
साध्याभावपदेनविवक्षितइतिभावः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकाभाव
विवक्षणे तथाविधवह्निघटोभयाभावमादाय तद्दोषतादवस्थ्यमतः प्रथमरीत्येति नोक्तं साध्यतावच्छे
दकावच्छिन्नप्रतियोगिताकाभाव विवक्षणे वाच्यत्वादिसाध्यकस्थले वाच्यत्वत्वादिना घटाघटभावमादा
यल्लक्षणासमन्वयेपि स्वरूपसंबंधेन तादात्म्यसंबंधेन वा प्रमेयमात्रसाध्यकस्थले तथाविधाभावाप्रसिद्ध्या
व्याप्तिरतो व्यापकतावच्छेदकपर्यंतानुधावनं तथा ज्ञेयत्वत्वादिना वाच्यत्वाभाव एव तथेति न दोषः
साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशेऽपि वह्न्यादिसाध्यके तार्णतार्णोभयाभावादिक
मादाय दोषस्य व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायां निवेश्यवा ऽपि सत्त्वादिसाध्यकस्थले वि
शिष्टसत्त्वाद्यभावमादाय दोष इति तादृशाभावो न निवेशितः व्यापकतावच्छेदकावच्छिन्नप्रतियोगिता

न्यूनवृत्तिधर्मावच्छिन्नातिरिक्तधर्मावच्छिन्नावायाप्रतियोगितातदन्यत्वेन विशेषणीया तेन वन्ह्यादिसा
ध्यकस्थले वन्हित्वादिना महानसीयवन्हिघटान्यतराभावमादाय न दोषः न्यूनवृत्तित्वमतिरिक्तवृत्तित्वंचाधि
करणधर्म्याद्वृत्तं निर्वाच्यं तातोऽधिकरणधर्मावच्छिन्नाभावासंग्रह व्यापकतान्वसाध्यतावच्छेदकसंबंधावच्छि
न्नाग्राह्या तेन संयोगादिना वन्ह्यादिसाध्यके समवायादिना वन्ह्याद्यभावमादायासंभववारणाय साध्यता
वच्छेदकसंबंधावच्छिन्नत्वेन प्रतियोगितायां विशेषणीयतया समवायादिनाद्रव्यत्वादिसाध्यके विषयता
दिसंबंधेन साध्यव्यापकस्य ज्ञानादेः समवायादिनाभावमादाय दोषस्यानवकाशः तादात्म्यसंबंधेन प्रमे
यसाध्यकस्थले समवायित्वरूपमधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकत्वाकभेद एव लक्षणघटकः
समनियताभावैक्यमते तादृशभेदस्याधिकरणधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावाभिन्नतयाऽ १०३
धिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन तत्साजात्यस्यप्रसिद्धिसंभवात् यत्तु संयोगेन प्रमेयत्ववान्नेति

प्रतीतिसाक्षिकः संयोगावच्छिन्नत्वमेव यत्वनिष्ठप्रतियोगितावच्छेदकताकभेद एव लक्षणघटकं अत्यंताभावस्ये
व येन संबंधेन तद्वृत्तित्वविरोधिधर्मत्वसंबंधेन तदवच्छिन्नप्रतियोगिताकभेदस्याप्युक्तप्रतीतिबलात् सिद्धिरिति तन्न
वह्निमान् धूमात् गुणवान् द्रव्यत्वादित्यादौ विषयितादिसंबंधेन वह्नित्वगुणत्वादिमतः साध्यतावच्छेदकसंबंधा
वच्छिन्नाभावस्याव्यावर्त्तनाय व्यापकतावच्छेदकताघटकसंबंधावच्छिन्नत्वेन प्रतियोगितावच्छेदकताया अव
श्यं निवेशनीयं तया तादृशाभावस्याप्रामाणिकत्वेपि लक्षणघटकत्वासंभवात् न उक्तकपिसंयोगी एतद्वृक्षत्वा
दित्यादौ कपिसंयोगत्वावच्छिन्नकपिसंयोगाभावस्यापि लक्षणघटकतया तदधिकरणहेतोर्वृत्तेरव्याप्तिः न
च साध्यतावच्छेदकावच्छिन्नव्यापकताशरीरे प्रतियोगिवैयधिकरण्यनिवेशस्य निष्फलतया कपिसंयोगत्वा
देः साध्यव्यापकतावच्छेदकत्वाभावात् तादृशाभावानां न लक्षणघटकतेति वाच्यं संयोगेन वह्न्यादिसाधक
स्थले वह्नित्वादीनां संयोगरूपसाध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकत्वसंपत्तये व्यापकताशरीरे

१०४ प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकत्वात् अन्यथा साध्यवत्त्वोत्पत्तिकालावच्छेदेन वह्नित्वद्रव्यत्वाद्यवच्छि
न्नस्य संयोगसंबंधेनाभाववत्त्वात्साध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकस्यैवाप्रसिद्धिप्रसंगात् तथा
च तत्तदधिकरणपदेन तत्तदभावीयव्याप्यवृत्तित्वनिरूपकाधिकरणमेव विवक्षणीयं व्याप्यवृत्तितानिरूप
कत्वं च निरवच्छिन्नाधेयतानिरूपकत्वं एवं च संयोगाद्यभावस्य तथाविधाधिकरणं गुणादिरेवेति न दोषः
इत्थं च कपिसंयोगाभाववान् कपिसंयोगाधिकरणत्वाभाववान्वा मेयत्वादित्यादौ कपिसंयोगतदधिकरण
त्वादिरूपाणां यावत्साध्याभावांतःपातिनामभावानां तथाविधाधिकरणाप्रसिद्ध्याव्याप्तिरतः साध्याभावं व्या
प्यवृत्तित्वेन विशिनष्टि व्याप्यवृत्तिश्चेति तथा च तादृशाभावस्य तथाविधयावदंतर्गततया तथाविधाधिक
रणाप्रसिद्धावपि न क्षतिः व्याप्यवृत्तित्वं च निरवच्छिन्नवृत्तिकत्वं न त्ववच्छिन्नवृत्तिकान्यत्वं तथात्वे तु संयोगेन १०५
धूमादिसाध्यकव्यभिचारिणि संयोगेन धूमत्वाद्यवच्छिन्नधूमाभावस्य महानसादाववच्छिन्नवृत्तिकतया॰

योगोलकान्यत्वाद्यभावे साध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वविर
द्धे एव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतयातिव्याप्तिः एवंच वन्ह्यभावसंयोगा
द्यभावस्यापि किंचिन्निरवच्छिन्नवृत्तिकत्वेन लक्षणघटकतया तदीयव्याप्यवृत्तितानिरूपकाधिकरणवृत्ति
त्वाभावमादाय दोषवारणायाधिकरणपदस्य व्याप्यवृत्तितानिरूपकाधिकरणपरत्वमावश्यकमित्यवधेयं का
लिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावे साध्ये आत्मत्वादिहेतौ अव्याप्तिः व्याप्यवृत्तेः साध्याभाव
स्याकाशाभावरूपस्य व्याप्यवृत्तितानिरूपकाधिकरणात्मादौ हेतोर्वृत्तेरस्तद्भावीयप्रतियोगितावच्छेदका
वच्छिन्नवैयधिकरण्यनिरूपकाधिकरणमेव तत्तदधिकरणपदेन विवक्षणीयं प्रतियोगितावच्छेदकावच्छिन्न
त्वानिवेशादेतद्रूपान्यत्वविशिष्टगुणत्ववान् गुणत्वादित्यादौ समवायरूपसाध्यतावच्छेदकसंबंधघटितविशि
ष्टसाध्यव्यापकतावच्छेदकविशिष्टगुणत्वत्वावच्छिन्नाभावस्य प्रतियोगिवैयधिकरण्यनिरूपकतायां हेतुम

१०५ त्वसत्वेपि नातिव्याप्तिः [redacted] धावच्छिन्नप्रतियोगिताकाकाशत्वाभावाभावादिसाध्यकात्मत्वादि
हेतावव्याप्तिः तत्राव्याप्यवृत्तियावत्साध्याभावांतःपातिनञाकाशत्वाभावादेः प्रतियोगितावच्छेदकावच्छिन्नवैय
धिकरण्यनिरूपकतायाहेतुमत्यसत्वेपि नातिव्याप्तिः तथाच कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशत्वाभा
वाभावादिसाध्यकात्मत्वादिहेतावव्याप्तिः तत्राव्याप्यवृत्तियावत्साध्याभावांतःपातिनञाकाशत्वाभावादेः प्रति
योगितावच्छेदकावच्छिन्नवैयधिकरण्याप्रसिद्धिः कालेप्याकाशावच्छेदेन तादृशसाध्यरूपतदभावीयप्रतियोगि
सत्वात् सर्वत्रैव तादृशाभावस्यप्रतियोगिसमानाधिकरणत्वात् अतोव्याप्यवृत्तित्वमुपेक्ष्य तादृशाभावोप्रति
योगितावच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेशयति प्रतियोगितावच्छेदकावच्छिन्नेति अत्रच समनियता
भावैक्यमते विशेषाणामेव व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितया तत्प्रतियोग्यनधिकरणाप्रसिद्ध्यातदसं १०५
ग्रहः विशिष्टसाध्यव्यापकतावच्छेदकावच्छिन्नाय किंचित्प्रतियोगिताश्रयवैयधिकरण्यनिवेशान्काच्यत्वत्वादि

नाघटाद्यभावस्यघटादिवैयधिकरण्येनलक्षणघटकतानिवार्हेपिप्रतियोगिभेदेनप्रतियोगिताभेदस्मतेऽज
न्यत्वानविषयत्वादिसाध्यकेयत्किंचित्कालावच्छेदेनपरमाण्वादौप्रसिद्धस्यसाध्यतावच्छेदकावच्छिन्नाभावस्य
यत्किंचित्प्रतियोग्यनधिकरणवृत्तेः प्रतियोगिवैयधिकरण्यनिरूपकाधिकरणाप्रसि[illegible]व्याप्तिः तत्रापिय
त्किंचित्प्रतियोगितात्वभावेनतादृशानधिकरणत्वप्रसिद्धिसंपादनेयत्किंचित्प्रतियोगिताश्रयप्रतियोगिवैय
धिकरण्यनिरूपकाधिकरणेहेतोर्वृत्त्याव्याप्तितादवस्थ्यम् एवंवन्हिमान्धूमादित्यादौऽद्रव्यत्वाद्यवच्छिन्नस्यसंयो
गेनयोऽभावःतस्यद्रव्येउत्पत्तिकालावच्छेदेनवर्त्तमानस्यगुणादौप्रतियोगिस्वाधिकरणस्यप्रतियोगिवैयधिकर
ण्यनिरूपकाधिकरणगुणादौहेतुतावच्छेदकसंबंधेनवृत्तेरप्रसिद्ध्याव्याप्तेर्वारणायहेतुतावच्छेदकसंबंधेनकस्य
चिदधिकरणेप्रतियोगिवैयधिकरण्यमभावेविशिष्टसत्तात्वाद्यवच्छिन्नाभावस्यद्रव्याधिकरणेसत्तादिरूपप्रति
योगिसमानाधिकरणतयाअधिकरणधर्मावच्छिन्नाभावस्यैवलक्षणघटकतयाऽतिव्याप्तिरतःप्रतियोगितावच्छे

योगिसमानाधिकरणाये यत्तदन्यत्वं व्यधिकरणंतार्थः ननु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यन
धिकरणवृत्तित्वं व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोग्यप्रसिद्ध्याऽसंग्रहात् नन्वेवं सति धूमवान् वह्नेरि
त्यादौ साध्यतावच्छेदकीभूतसंयोगसंबंधघटितव्यापकतावच्छेदकधूमत्वाद्यवच्छिन्नसंयोगसंबंधावच्छिन्न
प्रतियोगिताकानां धूमाद्यभावानामुत्पत्तिकालावच्छेदेन धूमादिमत्तिवृत्तेर्व्यधिकरणधर्मावच्छिन्नाभावस्ये
व प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणतयानिव्याप्तिरिति वाच्यं साध्यतावच्छेदकसंबंधेन व्या
पकतामनिवेश्य येन संबंधेन व्यापकता तत्संबंधावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावं निवेश्य विषयता
संबंधेन साध्यव्यापकज्ञानस्य समवायसंबंधावच्छिन्नाभावमादायोक्तदोषस्य वारणीयतयाऽयोगोलकभे
दादेरभावमादायातिव्याप्तिवारणासंभवात् यादृशप्रतियोगितावच्छेदको यो धर्मस्तद्विशिष्टतादृशप्रति
योगिताश्रयसामानाधिकरण्यं विवक्षणीयं तेन समनियताभावैक्यमते वान्यत्वत्वादिना घटाद्यभावस्या

पिघटत्वादिनाव्यत्वाभावाभिन्नतयावाच्यत्वादिप्रतियोगिकत्वेनप्रतियोगितावच्छेदकवाच्यत्वत्वादिवि
शिष्टवाच्यत्वादिरूपप्रतियोगिसमानाधिकरणत्वेपिनक्षतिः नन्वेवमपिवाच्यत्वादिसाध्यकस्थलेसर्वे
षामभावानांपूर्वक्षणादिवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनासमानाधिकरणत्वात्प्रतियोग्यसमा
नाधिकरणाभावाप्रसिद्धिरितिवाच्यं स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणवृत्त्यभावीयप्रतियोगितानि
न्नत्वेनव्यापकतावच्छेदकावच्छिन्नप्रतियोगिनाविशेषणीयेत्यत्रैवप्रतियोगितावच्छेदकेसादेश्यात्पर्याप्ति
वाच्यत्वत्वावच्छिन्नघटादिनिष्ठप्रतियोगितायाः स्वावच्छेदकविशिष्टस्वाश्रयाप्रसिद्धानिरुक्तप्रतियोगिता
भिन्नत्वेनतन्निरूपकाभावमादायवाच्यत्वादिसाध्यकेलक्षणसमन्वयसंभवात् नचतथापिएतदभावभि
न्नमेयत्वादिसाध्येसाध्यव्यापकतावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्यैतदभाव
मात्रवृत्तेरभावमात्राधिकरणकतयाऽधिकरणस्वरूपत्वादेतदभावभेदादिरूपप्रतियोगिसमानाधिकर १०७

णेषा निरुक्तप्रतियोगिताभिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकोऽभावो व्यधिकरणधर्मावच्छि
न्नाभाव एवेत्यतिव्याप्तिरिति वाच्यं स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणधर्मावच्छिन्नाभाव एवेत्यतिव्या
प्तिरिति वाच्यं स्वावच्छेदकविशिष्टस्वाश्रयाधिकरणे स्वनिरूपकाभावत्वेन वर्त्तते योऽभावस्तदीयप्रतियो
गिताभिन्नत्वेन व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताया [illegible]णीयतया एतदभावाधि[illegible] एतद
भावभिन्न एतदभावत्वेन एतदभावरूपैतदभावभेदाभावस्य वृत्तावपि तादृशाधिकरणे एतदभाव
भेदो नास्तीत्यप्रतिव्याप्त्या एतदभावभेदत्वावच्छिन्नप्रतियोगिकाभावत्वेन तस्यावृत्तित्वादेतदभावभेदत्वा
वच्छिन्नप्रतियोगिताया निरुक्तप्रतियोगिताभेदस्याक्षतत्वादित्याहुः तच्चिन्त्यं व्याप्यताघटकसंबंधाव
च्छिन्नाभावनिवेशे व्यापकताशरीरे प्रतियोगिव्यधिकरणपदस्याभावविशेषणत्वेऽपि संयोगादिना धूमादि
साध्यकस्य निवारणेऽयोगोलकान्यत्वाद्यभावमादायातिव्याप्तिवारणसंभवात् तत्र तन्निवेशे प्रयोज

१०८ नाभावेनाव्याप्यवृत्तिसाध्याभावमादायाव्याप्तेनवकाशादभावेव्याप्यवृत्तित्वादिविशेषणमाहत्यसंभ
तेः अस्तुवासाध्यव्यापकतावच्छेदकस्यापिसाध्यवन्निष्ठअधिकरणधर्मविछिन्नप्रतियोगितावछेदकत
यातदभावव्यावर्त्तनायव्यापकताशरीरेप्रतियोगिवैयधिकरण्यप्रवेशस्तथाप्येतादृशप्रतियोग्यसामा
नाधिकरण्यविवक्षणेतस्याव्याप्तिवारणप्रयोजनकत्वाभिधानासंगतिः अभावेतदनिवेशेव्याप्यवृत्ति
साध्यकेपिभावत्साध्यवद्विषयकजन्यज्ञानव्यक्तिविशेषस्यप्रतियोगिवैयधिकरण्यघटितसाध्यव्याप
ताश्रयत्वात्कालविशेषावच्छेदेनहेतुमतितदभाववृत्तेरसंभावस्यैवप्रसंगात् परंतुप्रतियोगिताव
च्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्तित्वमेवतदर्थः नन्वअधिकरणधर्मावच्छिन्नाभावस्यप्रतियोगि
तावच्छेदकविशिष्टप्रतियोग्यप्रसिद्धेः केवलान्वयिसाध्यकेप्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्य १०८
धिकरणसाध्याभावप्रसिद्धेरव्याप्तिरितिवाच्यंप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणवृत्ति

त्वं दिस्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकभेदवद्वृत्तित्वं तेयं यत्व
त्वादिनावान्यत्वाद्यभावस्य तादृशभेदसमानाधिकरणतयाप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवै
यधिकरण्यं मुघटेमेवव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकत्वे यत्वत्वादिनावान्यत्ववद्भेद
स्यैव तथात्वात् कपिसंयोगाभाववान्मेयत्वादित्यादौ कपिसंयोगादिरूपसाध्याभावस्यापित्वेयत्वत्वा
दिनाकपिसंयोगाभाववादिमद्भेदसामानाधिकरण्यसत्वात् तस्य च स्वप्रतियोगितावच्छेदकावच्छिन्नवैयधि
करण्यनिरूपकाधिकरणाप्रसिद्धाः व्याप्तिरतः प्रतियोगितावच्छेदकावच्छिन्नत्वं भेदप्रतियोगितावच्छेद
कतायां विशेषणं तत्रैव कपिसंयोगात्मकाभावीयप्रतियोगितावच्छेदकीभूतसमवेतसामान्याभाव
त्वावच्छिन्नसमवेतसामान्याभाववद्भेदस्यापि तिरूक्तप्रतियोगितावच्छेदकताकत्वात्तत्सामानाधिकरण्य
मादाय कपिसंयोगाद्यात्मकाभावानां प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्य वारणाय समा

ध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणीयं समवेतसामान्याभावत्वा
देः कपिसंयोगाभावादिव्यापकतानवच्छेदकतया न दोषः नचात्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छे
दकत्वेन प्रतियोगितावच्छेदके विशेषिते तत्र साध्यवत्त्वाभावादीनामीदृशप्रतियोगितावच्छेदकावच्छिन्नप्र
तियोगिवैयधिकरण्यं न घटते साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकीभूतस्य प्रतियोगितावच्छेदका
प्रसिद्धेस्तथाचे साध्याभाववत्त्वस्यादिना साध्याभावपदेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपाव
च्छिन्नप्रतियोगिताकाभावविवक्षणासंगतिरिति वाच्यं साध्याभाववत्त्वस्यादिग्रंथस्य व्याप्यवृत्तित्वनिवेशक
त्वेऽभावे साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणदानपरत्वात् द्वितीयकल्पे च प्रतियोगितावच्छेदकाव
च्छिन्नेत्यत्र प्रतियोगितावच्छेदकस्य तादृशव्यापकतावच्छेदकत्वेन विशेषणात्तादृशरूपावच्छिन्नप्रतियो १०९
गिताकत्वं वाभावे लक्षणघटकेऽसमर्थकत्वात् एतत्कल्पे अभावांशे तादृशप्रतियोगिताकत्वविशेषणवि

रद्धेपि क्षतिविरहात् तत्रैव कपिसंयोगाभावत्वादिना घटादिमद्भेदसामानाधिकरण्यमादाय तद्दोषवा
रणाय स्वप्रतियोगिवृत्तित्वं भेदप्रतियोगितावच्छेदकतायां विशेषणं संयोगसामान्याभावादेरपि कपिसं
योगाद्यात्मकाभावप्रतियोगितया कपिसंयोगाद्यात्मकाभावस्य प्रतियोगितावच्छेदककपिसंयोगाभावत्वा
दिना संयोगसामान्याभाववद्भेदसामानाधिकरण्यमादाय तद्दोषतादवस्थ्यवारणाय यपपादन्नुप्रतियोगि
तावच्छेदको यो धर्मस्तदवच्छिन्नतादृशप्रतियोगिताश्रयवृत्तित्वमेव भेदप्रतियोगितावच्छेदकतायां निवे
शनीयं कपिसंयोगाभावत्वं च कपिसंयोगाभावनिष्ठप्रतियोगितायामेवावच्छेदकं संयोगसमान्याभाव
श्च न तादृशप्रतियोगिताश्रय इति तादृशभेदमादाय न दोषः भेदप्रतियोगितावच्छेदकतायां स्वप्रतियो
गितावच्छेदकसंबंधावच्छिन्नत्वमपि निवेशनीयं तेन कपिसंयोगाभावत्वाद्यवच्छिन्नकपिसंयोगाभावादि
निष्ठविषयितादिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदसमानाधिकरण्येपि न तद्दोषतादवस्थ्यम् एवं

११९ प्रतियोगितावच्छेदकताकभेदसमानाधिकरण्येपिनतद्दोषतादवस्थ्यं एवंप्रतियोगितावच्छेदकावच्छिन्न
१६९ वैयधिकरण्यनिरूपकत्वंस्वनिष्ठंयत्स्वप्रतियोगितावच्छेदकावच्छिन्नस्वप्रतियोगिनिष्ठप्रतियोगिताव
च्छेदकताकभेदसा[illegible]धिकरण्यंतन्निरूपकत्वंअतोव्यधिकरणधर्मावच्छिन्नाभावस्यप्रतियोगिताव
च्छेदकविशिष्टप्रतियोग्यप्रसिद्धावपिनतादृशाधिकरणाप्रसिद्धिः कपिसंयोगित्वत्वादिसादेर्हेत्वधि
करणेपिद्रव्यत्वादिनाकपिसंयोगादिमतःकपिसंयोगत्वादिनाचद्रव्यत्वादिमतोभेदसत्वात्तस्यापि
तादृशाधिकरणत्वापत्तिरतोऽवच्छिन्नांतनिष्ठांतयोरूपादानं पूर्वलक्षणादिवृत्तित्वविशिष्टस्वाभावत्वादिप्र
तियोगितावच्छेदकरूपेणकपिसंयोगादिमद्भेदमादायतद्दोषतादवस्थ्यमतस्तत्प्रतियोगिताश्रयनिष्ठप्र
तियोगितावच्छेदकतायांतदवच्छेदकावच्छिन्नत्वंनिवेशनीयं एवंविशिष्टसाध्यव्यापकतावच्छेदकत्वेनापिप्र ११९
तियोगितावच्छेदकंविशेषणीयं तेनसंयोगीद्रव्यत्वादित्यादौसंयोगाभावस्यद्रव्यवृत्तित्वात्तत्प्रतियोगि

तावच्छेदकान्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावत्वावच्छिन्नान्यवृत्तित्वविशिष्टत्वावच्छिन्नाभावनिष्ठप्रतियोगि
तावच्छेदकताकभेदवत्त्वस्य द्वयसत्त्वान्न तस्य प्रतियोगिवैयधिकरण्यनिरूपकत्वापत्तिः एवं संबंधविशेषनि
वेशनमपि पूर्ववद्बोध्यम् तथा च स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकसाध्यतावच्छेदकावच्छि
न्नव्यापकतावच्छेदकरूपावच्छिन्ना यावन्तः प्रतियोगितास्तदवच्छेदकावच्छिन्नतत्तदाश्रयनिष्ठप्रतियोगिताव
च्छेदकताकभेदवदधिकरणवृत्तित्वव्यापकप्रतियोगिकोऽत्र तत्प्रतियोगितानिरूपकाभावसजातीया
भावत्वमिति निष्कर्ष इति प्राहुः अभावे यथाश्रुतसाध्यप्रतियोगिकत्वं परित्यज्य स्वप्रतियोगितावच्छेद
केसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वविशेषणस्य व्याप्यवृत्तित्वादिविशेषणस्य च व्यावृत्तिमाह
तेनेति तत्र साध्यस्यैकैरभाववति द्रुतर्हि त्रावपि नाव्याप्तिरिति योजना एतद्रूपवान् एतद्रूपमादित्यादौ प्रति
योगितावच्छेदकेऽवच्छिन्नप्रतियोगिव्यधिकरणसाध्याभाववत्त्वनिः साध्यमेव तत्र हेतोरवृत्तेर्लक्षणगमनसंभ

१११ वान्नासंभवः अथसाध्यवतितत्र तद्रूपेतद्रूपोभयत्वावच्छिन्नाभावसत्वेन तत्रापिलक्षणगमनासंभवा
दसंभवः नचनामोऽप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकमधिकरणः प्रतियोगितावच्छेदकीभूतोभ
यत्वेनरूपेणोभयवच्छेदस्यउभयवतोसिद्धत्वेनाप्रसिद्धेरितिवाच्यं उभयत्वेनान्यतरवच्छेदस्यतादृशाभा
वप्रतियोगितावच्छेदकावच्छिन्ननतत्प्रतियोगिवृत्तिप्रतियोगितावच्छेदकताकस्यउभयत्वेनान्यतराभावव
तिसत्वात्तस्यापितादृशाभेदमादायतत्वादितिचेन्नःव्यासज्यवृत्तिधर्मानेवच्छिन्नप्रतियोगिताकस्यस्वव्याप
कसाध्यतावच्छेदककप्रतियोगिताकस्यवाऽभावस्यनिवेशेतादृशोभयाभावादिवारणेसंभवतीत्यभिप्रा
येणाव्याप्तिलिखनात् अव्याप्यवृत्तेरिति यद्यप्येतद्ग्रंथस्यस्वयमुक्तस्याभावेव्याप्यवृत्तित्वादिनिवेशानस्य
प्रयोजनप्रदर्शनपरत्वेसाध्यपदं कपिसंयोगाभावादिपरमेव वाच्यं नतुकपिसंयोगादिपरंकपिसंयोगा
दिसाध्यकस्थलेकपिसंयोगाद्यभावस्यलक्षणघटकत्वेपिस्वाधिकरणपदस्यव्याप्यवृत्तित्वादिनिरूपका १११

धिकरणापरतयाभावेव्याप्यवृत्तित्वादिनिवेशनस्यावश्यकत्वाभावात्तदीयव्याप्यवृत्तितानिरूपकाधिकर
णेगुणादौहेतोरवृत्तेरव्याप्तेरनवकाशात्कपिसंयोगाभावादेर्गुणादौनिरवच्छिन्नवृत्तिकत्वादिरूपव्याप्यवृत्ति
त्वादिमत्वेनतादृशविशेषणव्यावर्त्तनासंभवाच्चतथाचकपिसंयोगाभावादिसाध्यकस्थलेकपिसंयोगाद्या
त्मभावस्यलक्षणघटकत्वेपितदीयव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धेरेवाव्याप्तिप्रयोजिकानतुतादृ
शाभावीयव्याप्यवृत्तितानिरूपकाधिकरणेहेतोर्वृत्तिरितिवृत्तावपिहेतोरितिनसंगच्छतेतथाप्यभावेव्या
प्यवृत्तित्वविशेषणानुपादानेयावदंतर्गतकपिसंयोगादीनांव्याप्यवृत्तितानिरूपकाधिकरणाप्रसिद्धिः
स्यादितितादृशाधिकरणपर्यंतंनविवक्षणीयंतथाचसतिअव्याप्यवृत्तिसाध्यकस्थलेहेतोःसाध्याभावा
वृत्तित्वनिबंधनाव्याप्तिःसाचव्याप्यवृत्तितायुपादानात्संभवतीत्यभिप्रायःअथवाकपिसंयोगादिसा
ध्यकस्थलेहेतोःसाध्याभावीयव्याप्यवृत्तीतिनिरूपकाधिकरणवृत्तित्वंतत्स्थलीयाव्याप्तिवारकव्याप्यवृत्ति

तानिरूपकाधिकरणावृत्तित्वनिवेशोंपपिकमतस्तदधीनापाकपिसंयोगाभावादिसाध्यकस्थलेकपिसंयो
गाद्यात्मकाभावीयतादृश्याधिकरणाप्रसिद्धिनिबंधनाव्याप्तिस्तत्संपादकमर्पीतिनतादृशग्रंथासंगतिः
एतेनव्याप्यवृत्तितानिरूपकाधिकरणानिवेशेव्याप्यवृत्तिसाध्यकस्थलेपिलक्षणाविशेषवृत्तित्वविशिष्टसा
ध्याभावस्यप्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकीवच्छिन्नप्रतियोगिताकस्यव्याप्यवृत्ते
रधिकरणाद्धेतौवृत्तिलक्षणागमनासंभवात्तत्रसंभवएवसंभवतीत्यव्याप्तिरितिलिखनंनयुज्यतेइत्यपि
निरस्तंएतद्रूपादिसाध्यकस्थलेस्वरूपसंबंधेनहेतौसाध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकरूप
वच्छिन्नाभावीयव्याप्यवृत्तितानिरूपकाधिकरणत्वस्यासमवायिनिप्रसिद्धेस्तत्रतादृशाधिकरणाप्रसि
द्धिनिबंधनलक्षणागमनासंभवादसंभवाभावात् तत्रसाध्याभावाधिकरणावृत्तित्वस्यहेतुवृत्तितानवच्छे ११२
दकविशेषधर्मस्यामृत्यवृत्तिधर्मावच्छिन्नाभावमादायव्यभिचारिण्येतिव्याप्तिस्तत्रतत्साध्याभाववदवृत्ति

त्वत्वावच्छिन्नाभावं निवेश्य न्वेद्यार्प्यनेतदात्म्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयस्य तादृशस्य तद्
वृत्तित्वत्वेन घटाद्यभावस्य प्रसिद्धिर्गुरुधर्मस्य प्रतियोगितावच्छेदकत्वांगीकार एव संभवति अन्यथा तादृ ॥
भाववद्वृत्तित्वत्वस्य वृत्तित्वत्वरूपलघुधर्मसमनियततया प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावा
प्रसिद्धेः अन्यूनानतिरिक्तवृत्तिरूपावच्छिन्नत्वनिवेशे ह्रदवृत्तित्वरूदान्यानिर्धूमवृत्तित्वोभयाभावादेर्नि
र्धूमवृत्तित्वसादिसमनियतधर्मावच्छिन्नप्रतियोगिताकतया तद्वृतिधूमावृत्तित्वत्वान्यूनव्यापकवह्न्यादि
दिहेतावतिव्याप्तिस्तत्साध्याभाववद्वृत्तित्वविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नाभावादिनिवेशे
वह्निर्धूमवृत्तित्वादिना ह्रदवृत्तित्वघटान्यतराभावमादाय तद्दोषतादवस्थ्यमित्यतादृशाभावं तत्तद
धिकरणवृत्तित्वाभावपदेन विवक्षयति तद्वदिति व्यापकांतमनवच्छिन्नांतं च प्रतियोगिताविशे
षणं प्रथमविशेषणप्रयोजनमाह तत्तत्साध्याभाववद्व्यक्तिविशेषेति यत्र व्यक्तौ हेतुरपि न वर्त्त

११२ नेतादृशह्रदादिव्यक्तेरित्यर्थः अनिवारनिरूपकत्वेत्वधिकरणमात्रवृत्तिर्योगोलोकादिव्यक्तिविशेषा
वृत्तित्वादिरूपसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावस्तद्व्यक्तिविशेषवृत्ति
त्वाभावस्य हेतावसंभवात् किंचिद्विशिष्टस्य तादृशाभाववद्वृत्तित्वस्याभावमादायातिप्रसंगं दर्शयति
पार्थिवत्वादिविशेषितस्येति अग्रिमेणसाध्याभाववद्वृत्तित्वस्येत्यनेनान्वितं वन्ह्यादौ पार्थिवत्वादिविशे
षणाभावात् तद्विशिष्टनिर्धूमवृत्तित्वाभावमादायेत्यर्थः द्वितीयविशेषणप्रयोजनं दर्शयति द्वित्वाद्यवच्छि
न्नस्येति घटनिर्धूमवृत्तित्वोभयत्वाद्यवच्छिन्नस्येत्यर्थः नातिप्रसंग इति ह्रदादिवृत्तित्वत्वपार्थिवत्वादिवि
शिष्टनिर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगितायावन्ह्यादिवृत्तिनिर्धूमवृत्तित्वाद्यवृत्तितया तत्तत्सा
ध्याभाववद्वृत्तित्वाव्यापकत्वात् द्वित्वाद्यवच्छिन्नाभावप्रतियोगितायाद्वित्वादिव्यासज्यवृत्तिताविरहेण ११२
निर्धूमवृत्तित्वादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपनिर्धूमवृत्तित्वत्वादिव्यापकत्वसत्वेपिव्यासज्यवृत्ति

धर्मावच्छिन्नत्वात्तादृशाभावानां लक्षणाघटकत्वादिति भावः व्यासज्यवृत्तिधर्मस्य तत्तत्साध्याभाववद्वृत्ति
त्वनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपव्यापकत्वविरहान्न तत्तत्साध्याभाववद्वृत्तित्वव्यापकधर्मावच्छिन्ना
भावनिवेशे द्वित्वावच्छिन्नाभावमादायातिप्रसंगस्य वारणसंभवेपि प्रतियोगितायां व्यापकत्वविशेषणाप्रवे
शे निर्धूमवृत्तित्वत्वादिना ह्रदादिवृत्तित्वघटान्यतराभावमादायातिप्रसंगो न शक्यते वारयितुमिति तत्र तद्वि
शेषणप्रवेशस्यावश्यकत्वे व्यासज्यवृत्तिधर्मावच्छिन्नाभाववारणाय तादृशधर्मानवच्छिन्नत्वमेव तत्र साध्याभाव
वद्वृत्तित्वव्यापकधर्मावच्छिन्नत्वापेक्षया लाघवान्निवेशयितुमुचितमिति तदेव निवेशितं व्यासज्यवृत्तित्वं
च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमिति साध्याभाववद्वृत्तित्वमिति साध्याभाववत्संबद्धत्व
मित्यर्थः तेन तादात्म्यसंबंधेन वृत्तेरप्रसिद्धावपि न तत्संबंधावच्छिन्नहेतुकाव्याप्तिः संबंधप्रतियोगित्वरूपसंबं
धितैकदेशसंबंधे हेतुतावच्छेदकसंबंधेनेति तृतीयार्थाभेदान्वयः वृत्तावपीति संबद्धत्वेपीत्यर्थः न दोषइ

११४ ति हेतुतावच्छेदकसंबंधानिवेशे वह्निमान्धूमादित्यत्र वह्न्यभाववत्संयुक्तत्वावच्छिन्नाभावप्रतियोगितायाः
वह्न्यभाववत्समवेतत्वाद्यवृत्तितया सामान्यतो वह्न्यभाववद्वृत्तित्वव्यापकत्वेन तादृशाभावस्य लक्षणघट
कत्वानुपपत्तेर्वह्न्यभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य तद्वृत्तित्वसामान्याभावस्य वह्न्यभाववत्सम
वेतत्ववति धूमेऽसत्त्वादव्याप्तिः प्रसज्यते हेतुतावच्छेदकसंबंधनिवेशे च निर्वह्निसंयुक्तत्वावच्छिन्नाभा
वस्यापि तादृशसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकत्वेन लक्षणघटकतया तमादाय
लक्षणसमन्वय इति भावः इत्थं च हेतुतावच्छेदकसंबंधेन साध्याभाववद्वृत्तित्वविवक्षणे च सतीति दोषः तद
विवक्षणे वक्ष्यमाणाप्रसिद्धिविरहादुपष्टम्भसंगतिः हेतुतावच्छेदकसंबंधेन कस्यचिदधिकरण इति अनुयो
गितासंबंधेन हेतुतावच्छेदकसंबंधवद्वृत्तिरित्यर्थः अथवा हेतुतावच्छेदकसंबंधेन धर्मवद्वृत्तिरित्यर्थः विशिष्य
हेतुतावच्छेदकपुरस्कारेण हेतुमत्त्वनिवेशनसंभवे बहुपदार्थघटितहेतुतावच्छेदकस्थले धर्मत्वेन निवेशाप ११७

स्यघातेन रूपेण निवेशे गौरवमिति सामान्यतो निवेशलाभाय कस्यचिदित्युक्तं अथ द्रव्यं गुणकर्मान्यत्वे
सति सत्त्वादित्यादौ समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि साध्याभावस्य सत्त्वादिरूपे हेतुसा
मानाधिकरण्यसंभवेऽपि हेतुतावच्छेदकविशिष्टहेतुसमानाधिकरणनिरुक्तसाध्याभावानां व्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकत्वनियमात्तादृशहेतुसमानाधिकरणत्वेनाभावविशेषणे केवलव्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकत्वरूपेणैव साजात्यविवक्षणं संभवतीति तन्निवेशनमप्रयोजनमिति चेन्न तथा
सति तादृशयावत्साध्याभावसजातीयत्वस्यैव लक्षणत्वसंभवति अनिवारिणि समानाधिकरणधर्मावच्छि
न्नाभावस्यापि विशिष्टहेतुसमानाधिकरणत्वेन लक्षणघटकतया तद्घटकयावदभावसजातीयाप्रसिद्धे
र्व्याप्तिविरहात् सद्धेतौ तादृशयावदभावसजातीयव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयत्किंचिदभा
वमादायैव लक्षणसमन्वयसंभवादिति । साध्याभाववद्वृत्तित्वाभाववत्त्वविशेषणवैयर्थ्यापत्तेः हेतुतावच्छे

व्याप्तेरुक्तविवक्षामंतरेणैवनिवारणंसंभवतीत्यवधेयं मिश्रास्तु साध्याभाववद्वृत्तित्वाभावरूपव्याप्तेर्जातिमा
न्सत्त्वात्द्रव्यं विवक्षामंतरेणैवनिवारणंसंभवतीत्यवधेयं मिश्रेष्टसत्त्वादिसाध्यव्याप्तिर्मूलोक्तसकलसाध्या
भाववत्तिष्टाभावप्रतियोगित्वरूपामेवव्याप्तिसाजात्यादिघटनया परिष्कृतवंतः तत्परिष्कृतेचयथाश्रुतेचवक्ष्या
माणदोषमुद्धर्तुमभावप्रतियोगित्वस्थलेस्वावच्छिन्नव्यापकतावच्छेदकतत्त्वप्रतियोगितावच्छेदकत्वरूपपरिभा
पिकतत्त्वप्रतियोगितावच्छेदकत्वाश्रयहेतुतावच्छेदकवत्त्वं निवेश्यायंतादृशलक्षणमाह यद्वेति तादृशः व्याप्यवृ
त्त्यः साध्याभावाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावाः प्रत्येकं तेषां
सजातीयस्य व्यापकीभूतस्याभावस्य एकैकतदभावसजातीयस्य तत्तदभावव्यापकीभूतस्य व्याप्यवृत्तेरभाव
स्य प्रतियोगितावच्छेदकेन यद्रूपावच्छिन्नं प्रति व्याप्यकत्वमवच्छिघटेप्रतियोगितावच्छेदकं यद्धेतुतावच्छेदकाव
च्छिन्ननिरूपितव्यापकतावच्छेदकं तद्रूपवत्त्वंतत्त्वं तेनरूपेणव्याप्यत्वं वह्निमान्धूमादित्यादौ वह्नित्वाद्यवच्छिन्न

वन्ह्याद्यभावसजातीयस्तद्व्यापकीभूतो धूमत्वाद्यवच्छिन्नधूमाभावः वन्हित्वाद्यवच्छिन्नघटाभावसजातीयः
तद्व्यापकीभूतः धूमत्वाद्यवच्छिन्नघटाद्यभावस्तत्प्रतियोगितावच्छेदकं धूमत्वादिकं धूमत्वाद्यवच्छिन्नव्यापक
तावच्छेदकमिति लक्षणसमन्वयः व्यभिचारिणि धूमत्वाद्यवच्छिन्नव्यापकतावच्छेदधूकेमात्वाद्यवच्छिन्नघटा
द्यभाववत्तादृशवह्नित्वाद्यवच्छिन्नवन्ह्याद्यभावसजातीयस्तदभावव्यापकवन्हित्वाद्यवच्छिन्नवन्ह्याद्यभावप्र
तियोगितावच्छेदकवन्हित्वादेर्वन्हित्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वेपि तादृशयावत्साध्याभावान्तर्गतधू
मत्वाद्यवच्छिन्नधूमाद्यभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकस्य कस्यापि वन्हित्वाद्यवच्छिन्नव्या
पकतावच्छेदकत्वाभावान्नातिव्याप्तिः प्रथमाभावे व्याप्यवृत्तित्वविशेषणात् कपिसंयोगी एतद्वृक्षत्वादित्या
दौ कपिसंयोगत्वाद्यवच्छिन्नकपिसंयोगाभावस्य केवलान्वयिनः सजातीयस्य व्यापकीभूतव्याप्यवृत्त्यभा[illegible]स्या
प्रसिद्धावपि नक्षतिः व्याप्यवृत्तित्वविशिष्टतदभावं प्रत्येतद्वृक्षत्वाद्यभावस्य व्यापकत्वात् साध्यतावच्छेदकसं ११६

वंधेन साध्यव्यापकताया विलक्षणीयतया संयोगेन द्रव्यस्याव्याप्यवृत्तिनामते संयोगेन तत्साध्यके तादृशसंबंधे
न व्यापकताप्रसिध्यर्थं व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यस्यावश्यनिवेशनीयतया साध्यवन्निष्ठप्रति
योगिसामानाधिकरण्याभावप्रतियोगितावच्छे[illegible]।पि संयोगत्वादेः साध्यव्यापकतावच्छेदकत्वमक्षतमि
ति ध्येयं नानाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभावसमानाधिकरणैकैकव्यक्तिसाध्यके यत्किंचिदधिकरणवृत्तित्व
विशिष्टसाध्याभावस्याव्यापकीभूताभावो न हेतुतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगि
ताक इति तादृशसाध्याभावव्यावृत्तेनाथ साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक
त्वनिवेशनं व्यापकतायां साध्यतावच्छेदकसंबंधघटितायामाद्या तेन समवायेन द्रव्यत्वादिसाध्यकगुणादिहेतौ वि
षयतायां साध्यव्यापकत्वानादेः साध्यतावच्छेदकसंबंधावच्छिन्नाभावप्रतिहेतुतावच्छेदकसंबंधावच्छिन्नहेत्वभा
वस्याव्यापकत्वेपि न क्षतिः साध्याभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताको ग्राह्यः तेन संयोगादिना

वन्ह्यादिसाध्यकधूमादिहेतौसमवायादिसंबंधावच्छिन्नप्रत्यभावप्रतिसंयोगादिनाधूमादिरभावस्याव्यापकत्वे
पिनक्षतिः अनिवारिणिसमानाधिकरणधर्मावच्छिन्नाभावव्यापकमधिकरणहेतुतावच्छेदकाद्यवच्छिन्नप्रति
योगिताकाभावमादायातिप्रसंगवारणायसजातीयत्वोपादानं व्यतिरेकिसाध्यकस्थलेयावत्साध्याभावसजा
तीयाप्रसिद्ध्याएकैकतत्सजातीयत्वनिवेशनं साजात्यघटकंसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वा
दिकमनुगतंनिरुक्तभेदकूटरूपमेवग्राह्यं अन्यथायत्रभिन्नभिन्नसंबंधेनसाध्यहेतुभावस्तत्रसाध्यतावच्छे
दकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावस्ययादृशप्रतियोगितानिरूपकत्वंतस्यैवतद्व्यक्तयासजाती
यत्वेनतत्सजातीयाभावनिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धेः सजातीयस्यापिसाध्य
तावच्छेदकसंबंधावच्छिन्नाभावस्यानिवेशाद्धेतुव्यापकतायाउपितत्संबंधघटितायाविवक्षणेउक्ताप्रसिद्धिनि
बंधनदोषासंभवेपिव्यापकीभूततस्यैतादृशवैयर्थ्यस्यदुर्वारत्वात् तस्मागेववरमलक्षणपर्यवसानात् अनिवा १९७

रिणि साध्यतावच्छेदकावच्छिन्नसाध्याभावसजातीयहेतुतावच्छेदकाद्यवच्छिन्नहेत्वाद्यभावमादायातिप्र
संगस्य वारणाय व्यापकीभूतस्येति व्यभिचारिणो भावस्य व्यभिचारनिरूपकाधिकरणे साध्याभावव्यापक
त्वाभावान्न दोषः व्यापकत्वं च न तत्सामानाधिकरण्याभावाप्रतियोगित्वं सर्वस्यैव तादृशहेत्वावच्छिन्नाभा
वप्रतियोगितयाऽसंभवात् न च तदधिकरणवृत्तित्वं हेतुतावच्छेदकसंबंधेनावच्छेद्यं वाच्यं तथा च वह्न्याद्यभा
ववति धूमाद्यभावस्य धूमाद्यनात्मकहेत्वाद्यवच्छिन्नाभावस्य संयोगादिरूपहेतुतावच्छेदकसंबंधेनावृत्ता
नत्वमादाय दोषावसर इति वाच्यं एवमपि यत्र स्वरूपसंबंधेन हेतुता तत्र तादृशाभावप्रतियोगितया हेत्वभा
वस्य व्यापकतानुपपत्तेर्दुर्वारत्वात् नापि तादृशाभावप्रतियोगितानवच्छेदकरूपवत्त्वं अभावत्वात्मकता
दृशरूपमादायाऽभावमात्रस्यैव व्यापकतया व्यापकत्वस्याव्यावर्त्तकतापत्तेः एवं वह्न्यभाववति धूमावयवा
दौ समवायादिना वर्त्तमानं धूमादिरूपमभावमादाय व्यापकताभंगनियाद्धेतुतावच्छेदकसंबंधेन सामाना

११८ धिकरण्यस्यनिवेशनीयतयासत्तावान्जातेरित्यादौसत्ताद्यभाववतिसामान्यादौहेतुतावच्छेदकसंबंधेनवृत्तेरा
प्रसिद्ध्याव्याप्तिश्चेति तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमेवसाध्याभावव्यापकत्वं निर्धूमोवह्निशून्य
त्वादित्यादौहेत्वभावस्यवन्ह्यादेःप्रत्येकंधूमादिमन्निष्ठभेदप्रतियोगितावच्छेदकत्वेपिजरखंडनिर्धूमत्वप्रकारक
प्रमाविषयत्वाद्यभावस्यतादृशव्यापकतासंभवात्तत्तत्प्रतियोगितावच्छेदकावच्छिन्नहेतुव्यापकतयैवलक्षण
श्रा समन्वयः तद्वन्निष्ठत्वंदैशिकविशेषणतयाह्यं अतोवन्ह्याद्यभाववतिधूमाद्यभाववद्भेदस्यकालिकादिसंबंधेन
वृत्तावपिनक्षतिः अभावाभावस्यप्रतियोगिरूपत्वेप्यभाववद्भेदोतिरिक्तएवातोधूमाद्यभाववव्यापकाभावीय
योगोलकादौदैशिकविशेषणतयावन्ह्याद्यभाववद्भेदस्यवृत्तिरव्याहतैवेतिनवन्ह्याद्यभावव्यापकतापत्तिः
अथवायदीयदैशिकविशेषणतासंबंधसामान्येतत्तत्साध्याभाववद्वृत्तिकिंचिद्व्यक्त्यनुयोगिकत्वाभावस्तद्वत्त्व ११८
मेवतदभावव्यापकत्वं अभावस्येतिसावच्छिन्नेत्यर्थकं तेनधूमवान्जलत्वाभावादित्यादौजलत्वादिनिरूपि

न दैशिकविशेषणतायाप्रसिद्धतत्तन्निरुक्तभेदकूटात्मकव्यापकतासत्त्वेपि नातिव्याप्तिः अभावरूपसद्धे
तौ हेतुमत्त्वप्रकारकप्रमाविषयत्वाद्यभावप्रतियोगितावच्छेदकावच्छिन्नव्यापकतामादायैव लक्षणसमन्वयः
धूमाभाववान् वन्हेरित्यादावयोगाकादावुत्पत्तिकालावच्छेनवर्त्तमानस्य वन्ह्याद्यभावस्य निरुक्तव्यापकतासत्त्वादति
व्याप्तिरतो व्याप्यवृत्तेरिति यद्यपि तादृशाभावाऽपि कदाचिदव्याप्यवृत्तयस्तथापि व्याप्यवृत्तित्वविशिष्टस्य व्यापक
त्वं विवक्षणीयं अनवच्छिन्नविशेषणतासंबंधेन व्यापकतानिवेशलाभायैव तदुक्तं अवच्छिन्नवृत्तिकान्यत्वरूपं
व्याप्यवृत्तित्वं तु न शक्यते निवेशयितुंसं योगे नसद्धेतौ हेतुतावच्छेदकसंबंधावच्छिन्नहेत्वभावस्य तथात्वा
त् प्रतियोगितेत्यत्र प्रतियोगिता हेतुतावच्छेदकसंबंधावच्छिन्ना ग्राह्या अन्यथाव्यधिकरणसंबंधावच्छिन्नप्र
तियोगिताकहेत्वभावस्य साध्याभावव्यापकस्य समनिममनियताभावैक्यमते व्यधिकरणधर्मावच्छिन्नप्रति
योगिताकाभावरूपतया समानाधिकरणधर्मावच्छिन्नसाध्याभावासजीयत्वेन तद्दोषायातिव्याप्तिविरहेपि

११९ आत्मत्वादिसाध्यके विषयतयाहेतौ ज्ञानादौ साध्याभावव्यापकसमवायसंबंधावच्छिन्नज्ञानाद्यभावमादायातिव्या
प्तिः अभावे हेतुतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वविशेषणं प्रवेश्यत्वनातिप्रसंगवारणासंभवः सम
नियताभावैक्ये समवायसंबंधावच्छिन्नज्ञानाद्यभावस्यापि स्वसमावायिविषयकत्वसंबंधेन ज्ञानादिविशिष्टज्ञा
नादेर्विषयतासंबंधावच्छिन्नाभावसमनियतत्वेन तादृशसंबंधावच्छिन्नप्रतियोगिताकत्वात् धूमाद्यभा व्याप्य
कसद्दाननियतवन्ह्यभावप्रतियोगिनो वन्हित्वादिना वन्हित्वावच्छिन्नव्यापकत्वादतिप्रसंग इति प्रतियोगिनो व्या
पकतानुपेक्ष्य प्रतियोगितावच्छेदकस्य तदवच्छेदकत्वपर्यंतानुधावनं द्रव्यं विशिष्टसत्वादिसादौ साध्याभावव्या
पकाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेर्हेतुतावच्छेदकोपलक्षितहेतुव्यापकत्वासंभवात् यं प्रतीत्य
त्युक्तापद्रूपावच्छिन्नं प्रतीत्युक्तं व्यापकतांहेतुतावच्छेदकादेः कालिकादिसंबंधेन हेतुव्यापकतायामवच्छेदक
त्वेपि नातिप्रसंगः व्यापकतावच्छेदकताघटकसंबंधभेदनिवेशनादिकं स्वयमूह्यं नत्वधूमवान् वन्हिमत्त्व ११९

कारकप्रमाविषयत्वादित्यादावतिव्याप्तिर्धूमाद्यभावव्यापकधूमाद्यभावस्य प्रतियोगितावच्छेदकजलादिवृ
त्तित्वविशिष्टधूमाभावाभावत्वादेर्हेतुतावच्छेदकस्वरूपसंबंधघटितहेतुव्यापकतावच्छेदकत्वादितिवाच्यं
भाववृत्तिप्रतियोगितावच्छेदकस्य व्यापकतावच्छेदकतयाविवक्षणीयत्वात् यथाश्रुतमिश्रलक्षणमुपन्य
स्य दूषयति साधनस्येति तादृशेति येये साध्याभावाप्रसिद्धाः तत्तत्सजातीयत्वव्यापके सर्वः तदवच्छेदकत्वं
तादृशप्रतियोगितावच्छेदकत्वे आद्ये द्रव्यं सत्त्वादित्यादाविति द्वितीये त्वयं प्रमेयादित्यादाविति ननु प्रमेयत्वा
देः केवलान्वयितावच्छेदकत्वेपि वाच्यत्वादेरिव साध्याभावव्यापकव्यधिकरणधर्मावच्छिन्नाभावप्रतियो
गितावच्छेदकत्वमक्षतमेवेत्याशयं निरस्यति प्रमेयत्वव्यधिकरणेति प्रमेयत्वस्य केवलान्वयित्वादिति भावः धू
माद्यभावं प्रतिविषयितादिसंबंधेन वह्नित्वाद्यवच्छिन्नस्य योऽभावस्तस्य व्यापकत्वात्तमादायात्मत्वे साध्ये सम
वायेन द्रव्यत्वे हेतौ आत्मत्वाभावं प्रतिविषयितासंबंधेन द्रव्यत्ववतः ज्ञानादेर्यः समवायसंबंधावच्छिन्नप्रतियो

१२० गिताकोभावस्तस्यव्यापकत्वात्तमादायातिप्रसंगस्य वारणाय प्रतियोगितावच्छेदकतायां हेतुतावच्छेदकताघट
कसंबंधावच्छिन्नत्वस्यावश्यं निवेशनीयतयाऽधिकरणसमवायादिसंबंधेन प्रमेयत्वस्याभावप्रतियोगितायाम
समानाधिकरणतायावच्छेदकत्वसंनिवेशेपिननिस्तारइत्यवधेयं अन्योन्याभावएवअधिकरणधर्मावच्छिन्नावच्छे
दकताकोनवत्यंताभावइत्याशयेनेदं अन्यथाघटत्वावच्छिन्नप्रमेयत्वा छिन्नप्रतियोगिताकात्यंताभावमादा
यलक्षणगमनसंभवात् एतदुपलक्षणं गुरुधर्मस्यप्रतियोगितानवच्छेदकत्वे कंबुग्रीवादिमत्वाद्यवच्छिन्नहेतु
काव्याप्तिरपिद्रष्टव्या एतेनव्यापकीभूताभावप्रतियोगिता । हेतुतावच्छेदकानवच्छिन्नत्वअधिकरणधर्मानव
च्छिन्नत्वोभयाभावविशिष्टे प्रमेयहेतुकस्थलेवाच्यत्वत्वादिनाघटाभावप्रतियोगितायां तादृशोभयाभावसत्वे
नलक्षणसमन्वयेपिननिस्तारः उक्तस्थलेहेतुतावच्छेदकावच्छिन्नत्वाप्रसिद्ध्याप्रतीकारात् उक्तलक्षणेसजातीयादि १२०
पदपरित्यागेनलघुलक्षणमाह यद्वेति व्याप्तिवारिणि अधिकरणधर्मावच्छिन्नाभावादिकमादायातिव्याप्तेर्वारणा

पयावंतइति वह्निमानधूमादित्यादौमहानसीयवह्नित्वाद्यवच्छिन्नाभावप्रतियोगिताकस्यधूमत्वाद्यवच्छिन्न
व्यापकतानवच्छेदकतयाऽव्याप्तिरिति:तादृशा इति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्न
प्रतियोगिताकइत्यर्थः अत्रव्याप्यवृत्ति[illegible]णंप्रयोजनंभावादनुपादेयं साध्याभावसजातीयत्वादिविशे
षणावच्छिन्नस्याप्यभावांतरस्यप्रकांतत्वात्तादृशपदेतस्यापरत्वमत्रमस्यस्फुटितिनिरासायाभावाइत्यतन्मात्रम
नभिधायसाध्याभावाइत्युक्तं यावत्साध्याभावनिरूपितानकाप्यपिप्रतियोगितेतिप्रत्येकपदं अत्रव्या
प्तिवारिणंप्रत्यपियत्किंचित्संबंधेनसाध्यतावच्छेदकावच्छिन्नस्यव्यापकतयाऽतिप्रसंगवारणायप्रतियोगि
तावच्छेदकसंबंधेनैवव्यापकतानिवेशनीया इत्थंचसमवायसंबंधावच्छिन्नवह्न्यभावप्रतियोगितावच्छे
दकसमवायादिसंबंधेनवह्नित्वाद्यवच्छिन्नस्यधूमाद्यव्यापकत्वात्असंभवइतिप्रतिप्रतियोगितावच्छेदक
संबंधेनैवसाध्यव्यापकताविवक्षणीया तथाचकेवलान्वयिसाध्यकस्थलेव्यधिकरणसंबंधावच्छिन्नसाध्या

भावनिर्वाहोनभवतीतिअधिकरणधर्मावछिन्नाभावस्याप्रतियोगितावोध्या धूमवान्वन्हेरित्यादौधूमाद्यभा
वप्रतियोगितावछेदकजलादिवृत्तित्वविशिष्टधूमाद्यभावाभावत्वेनवन्ह्यादिव्यापकत्वेपिनातिव्याप्तिःसाध्य
तावछेदकावछिन्ननिरूपितस्वावछेदकसंबंधघटितव्यापकतावछेदकावछिन्नायावत्यःप्रतियोगिताःप्रत्ये
कंतदवछेदकरूपेणतदवछेदकसंबंधेनयद्रूपावछिन्नंप्रतिव्यापकत्वमित्येतादृशार्थस्यैवविवक्षणीयत्वात् सा
ध्यव्यापकतावछेदकंयद्रूपंतेनव्यापकत्वविवक्षणेअधिकरणधर्मावछिन्नाभावोपयोगितानघटत्वइतिसा
ध्यव्यापकतावछेदकावछिन्नप्रतियोगितावछेदकत्वेनव्यापकतावछेदकनिवेशः यथासन्निवेशेनवैयर्थ्य
प्रतियोगितायाःस्वरूपसंबंधरूपत्वे वन्हित्वाद्यवछिन्नप्रतियोगितायावन्ह्यादिव्यक्तिभेदेनभिन्नायाःधूमत्वा
द्यवछिन्नव्यापकतावछेदकत्वेनसंभवतीतिव्यापकतावछेदकावछिन्नप्रतियोगितायाव्यापकतावछेदकत्वे
ननिवेशितं कूटघटितलक्षणेव्यभिचारिणिसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकोननिर्धूमवृत्ति १२१

त्वत्वाद्यवच्छिन्नाभावः अपितुजगद्वृत्तित्वसामान्याभावएवसन्व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकएव
वृत्तिमद्वृत्तिरित्यतिव्याप्तिवारणायकूटपदमुपात्तं तादृशातिव्याप्तिःसमानाधिकरणधर्मावच्छिन्नाभावसा-
धारणेनरूपेणसाध्याभावस्यसाध्यतावच्छेदककोटौप्रवेशनएवप्रसज्यते ननुविशिष्टसाध्याभावनिवेशात्तथा
सतिनिर्धूमवृत्तित्वावच्छिन्नाभावस्यापिलक्षणघटकतानिर्वाहादिति कूटपदमनुपादायविशिष्टसाध्याभा-
वंनिवेश्यैवलक्षणमुचितं तदुपादानेबहूनांदोषाणांवक्ष्यमाणत्वादितिकूटघटितलक्षणवादिनमाक्षेप्तुं
कूटाघटितंतल्लक्षणंदर्शयति यद्वेत्यादिना साध्याभाववद्वृत्तित्वस्यव्यधिकरणधर्मावच्छिन्नाभावमा-
दायव्यभिचारिमात्रेतिव्याप्तिरतोयावंतइति तथासतिसमानाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य
समानाधिकरणधर्मावच्छिन्नाभावस्ययावत्तादृशाभावांतर्गतस्यव्यभिचारिण्यसत्त्वान्नातिव्याप्तिः वृत्तिम-
द्वृत्तित्वानुपादानेसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यव्यधिकरणधर्मावच्छिन्नसाध्याभाववत्त्वं

गदा· ज्ञात्वा द्विरूपवृत्तिमतिवर्तमानस्य वारणासंभवात्‌ न हि मा ... मादि
ष्वाव्याप्तिर्दुर्वारैव। निर्धूमसंयुक्तत्वाद्यभावस्य ...

१२२

युक्तत्वाद्यभावस्यासंकादावप्रसिद्धस्य हेतावसत्त्वात्‌ संयोगा- संबंधेन हेतावव्याप्तिः यादृशसंबंधप्रतियोगित्वं
वस्तुमात्र एव तादात्म्यविषयितादिरूपतादृशसंबंधेन हेताव [illegible] रं लक्षणसमन्वयोऽभवितादृशसंबंधेन तद्ग
त्संबद्धत्वस्य समानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धेरिति तदुपादानं ननु वृत्तिमद्वृत्तित्वोपादानेऽपि गगनसंयु
क्तत्वाद्यवच्छिन्नाभावस्य निर्धूमवृत्तित्वाव्यापकप्रतियोगिताकतया वृत्तिमन्मात्रस्यैव निर्धूमकालादिवृत्तित्वेन वह्नि
धूमवृत्तित्वसामान्याभावस्याधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तित्वेन धूमवान्‌ वह्नेरित्यादावति
व्याप्तेर्वारणाय हेतुतावच्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव निवेशनीयतया यत्र संयोगादिना हेतुत्वं तत्र
जगत्संयुक्तत्वाद्यवच्छिन्नाभावस्यापि हेतुतावच्छेदकसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकत्वे च
न लक्षणघटकत्वात्‌ वृत्तिमत्त्वं यथाश्रुतार्थकत्वे कालिकसंबंधेन गगनादेरवृत्तित्वमते तेन संबंधेन यत्र हेतुता १२२
तत्रैव परमव्याप्तिवारकता तेन संबंधेन जगद्वृत्तिताभावस्यावृत्तिमात्रप्रसिद्धत्वादित्यतादृ हेतुतावच्छेदकसंबंधेनेति

व्याप्तिरिति नाव्याप्तिरित्यर्थः ननु व्याप्यसंभवः तादात्म्यकालिकसंबंधेन हेतौ लक्षणसमन्वयसंभवात् इति ननु ना
नाव्यक्तिसाध्यके तत्तत्साध्यव्यक्त्यभाववद्वृत्तित्वाभावस्य हेतौ सत्त्वाद्व्याप्तिः रूपघटितलक्षणइवात्रापि सा
ध्यतावच्छेदकसमनियतप्रतियोगिताकाभावनिवेशेपि नाव्याप्तिर्नाव्याप्तिर्द्रव्यत्वनोभयत्वावच्छिन्नाभावमादाय वन्ह्या
दिसाध्यके गुणादिवृत्तित्वविशिष्टसत्त्वाद्यभाववद्वृत्तित्वाभावमादाय च सत्त्वादिसाध्यके व्याप्तिर्दुर्वारैव एवं द्रव्यावृ
संयोगादि वृत्तित्वसाध्यके द्रव्यधिकरणस्य जगतएव कपिसंयोगत्वाद्यवच्छिन्नाभाववत्त्वात् तद्वृत्तित्वस्य व्यापकप्रतियो
गिताकस्य व्यधिकरणधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृत्तित्वेनाव्याप्तिविरहेपि तादृशकपिसंयोगाभावादि
साध्यकद्रव्यत्वादिहेतौ कपिसंयोगादिरूपसाध्याभाववद्वृत्तित्वाभावासत्त्वाद्व्याप्तिरित्यत आह साध्याभा
वश्चेति पूर्ववदिति मिश्रलक्षणे यथा साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगि
ताको व्याप्यवृत्तिरभावो निवेश्यते तथात्रापि निवेशनीय इत्यर्थः तत्र द्रव्यत्वकपिनोभयत्वाद्यवच्छिन्नप्र

तियोगिताकाभावे तु मात्रनिवेशे प्रकृतेहेतुसाधारणसमधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वविशेषण
×वाभावं प्रथमविशेषणेन कपिसंयोगादिरूपाभावानां च द्वितीयविशेषणेन व्यावृत्तिः ननु साध्याभाववद्वृत्तित्वप्रतियोगिकाभा×१
समानाधिकरणधर्मावच्छिन्नाभावोऽपि वृत्तिमद्वृत्तिः सम्भवतीति यावत्त्वादृशाभावान्तर्गतत्वं तद्धेतावभावाद् त्व
संभवः एवं समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तित्वस्य प्रकृतहेतुवृत्तितावच्छेदकीभूतयत्किंचिद्धर्मा
वच्छिन्नस्याभावोऽपि यावत्त्वादृशाभावान्तर्गत इति तद्वत्त्वविरहादपि व्यतिरेकिसाध्यकहेतू नाम व्यभिचा
रित्वानुपपत्तिः तत्र साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्य विवक्षितुमशक्यः केवलान्वयिनि
साध्याभाववद्वृत्तित्वत्वेन घटाद्यभावस्य तादृशगुरुधर्मस्य प्रतियोगितावच्छेदकत्वमते प्रसिद्धावपि तस्यात
यात्वमेव समधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य तद्घटककेवलवृत्तित्वत्वसमनियततया प्रतियो १२३
गितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्धेर्दुर्वारत्वात् तत्तदभाववद्वृत्तित्वघटकधर्मावच्छिन्नाभाव।

निवेशे च वह्नित्वाद्यवच्छिन्नवन्न्यायाप्यत्वमते तद्भावत्वावच्छिन्नाभावस्याप्रसिद्धतादृशतया तस्य च धूमादावसत्त्वा
द्व्याप्तिः साध्याभाववद्वृत्तित्ववृत्तितादृशधर्मावच्छिन्नाभावनिवेशनेऽपि घटवृत्तित्वत्वाद्यवच्छिन्नस्य साध्यकेता
दात्म्येन घटत्वव्यापकादिहेतोस्तादृशसाध्याभाववद्घटादिवृत्तित्वनिष्टतादृशसाध्याभाववत्त्वरूपतथाविध
मवच्छिन्नाभावस्य घटादिमात्रवृत्तेर्हेतावसत्त्वादव्याप्तिर्दुर्वारैव साध्याभाववद्वृत्तित्वघटकताविशेषनिवेशे
च गौरवमिति तत्र साध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकाभावं विवक्षयति तद्वदिति स्व
प्रतियोगिता अत्र साध्याभावस्य साध्याभावत्वेन सामान्यतो निवेशे व्यभिचारिणि धूमवृत्तित्वाद्यवच्छि
न्नाभावप्रतियोगितायामधिकरणधर्मावच्छिन्नसाध्याभाववत्साध्याधिकरणवृत्तित्वसाधारण्ये साध्या
भाववद्वृत्तित्वव्यापकत्वेन तादृशाभावस्य लक्षणाघटकतया वृत्तित्वसामान्याभावस्य तथाविधप्रतियोगि
ताकत्वमधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैव वृत्तिमद्वृत्तितयातिव्याप्तिरिति तत्र व्यक्तित्वेनाभाव

स्यव्याप्यतावच्छेदककोटिनिवेशलाभायतत्त्वादिति यद्यपियत्किंचित्साध्याभाववद्वृत्तित्वत्वसमनियतप्रतियो
गिताकवृत्तिमद्वृत्तियावदभाववत्त्वंव्यभिचारिसाधारणंयावतःसाध्याभावःप्रत्येकैतत्तदधिकरणवृत्तित्वत्वसम
नियतैकप्रतियोगितायाःनानाविपक्षकेप्रसिद्धिस्तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्तद्विपक्षवृत्तित्वत्वव्याप्य
प्रतियोगिताप्रसिद्धेः तथापियावतामभावानांप्रत्येकाधिकरणवृत्तित्वत्वसमनैयत्यस्यप्रत्येकप्रतियोगितान्व
येनैतदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकोयोऽभावस्तदभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्त्व
योऽभावस्तद्वत्त्वमित्येवरीत्यानिवेशान्नानुपपत्तिः एतल्लक्षणेसाध्याभावसमुदायोनसमुदायत्वेननिविष्टःअ
टधृटि पितुप्रातिस्विकरूपेणेतिकृताद्विशिषः अत्रोथात्रस्वपदं[illegible]तत्तदभावीयप्रतियोगितात्वरूपेणप्रतियोगि
तापरंसाध्याभाववद्वृत्तित्वातिरिक्तेपितदभावीयप्रतियोगितांतरसत्वादितितत्प्रतियोगिताव्यक्तिपरंतद्वा
च्यं तथाचयत्किंचित्प्रतियोगितानिरूपकाशेषाभावस्यातिव्यापकतयायावत्यस्तादृशप्रतियोगिताः प्र[illegible]कंतत्र १२४

न्निरूपकाभाववत्त्वं निवेशनीयं तथा च समानाधिकरणधर्मावच्छिन्नजगद्वृत्तित्वसामान्याभावप्रतियोगिता-
निरूपकवृत्तिमद्वृत्त्यभावाप्रसिद्ध्याव्याप्तिरिति वृत्तिमद्वृत्त्यभावीयत्वेन यावती प्रतियोगिता निवेशनीया तथा च
तन्निरूपकाभावे वृत्तिमद्वृत्तित्वविशेषणं व्यर्थं यावत्त्वविशेषणमपि तथेति चेन्नोपादीयते एव तत्र तद्विशेषणं
नि वृत्तिमद्वृत्त्यभावीययावत्प्रतियोगितो विशे[illegible]लाभायैव प्रतियोगिताविशेष्यीभूताभावे वृत्तिमद्वृत्तित्वयाव-
त्त्वाभिधानात् अत्र च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे स्वव्यापकतदभाववद्वृत्तित्वत्ववन्निष्ठभेदप्र- त्त
तियोगितावच्छेदकत्वस्याव्यावर्त्तकतया व्यापकत्वांशाघटितत्वेनाभावप्रतियोगितानवच्छेदकतया तदवच्छिन्ना-
न्योन्याभावनिरूपकव्यापकत्वपुरस्कारेण न प्रतियोगितानिवेशः संभवतीति तादृशावच्छेदकभेदकूटात्मकत्व-
पुरस्कारेणैव तन्निवेशः न च स्वव्यापकतत्तदभाववद्वृत्तित्वत्वकत्वे तदभाववद्वृत्तित्वत्ववन्निष्ठान्योन्याभावप्रति-
योगितावच्छेदकत्वावच्छिन्नैकभेदोभयरूपेण प्रतियोगितानिवेशसंभवादवच्छेदकभेदकूटनिवेशनमफल-

 मितिवाच्यं घटभेदादिसाध्यकस्थलेतदभावव्यक्तित्वेनघटत्वादिघटितस्यतदभाववद्वृत्तित्वत्ववन्निष्ठान्योन्या
भावप्रतियोगितावच्छेदकत्वस्यस्वरूपतोघटत्वादिघटितघटवृत्तित्वत्ववन्निष्ठान्योन्याभावप्रतियोगितावच्छेदक
त्वमपेक्ष्यगुरुशरीरतयाप्रतियोगितानवच्छेदकत्वेनतदवच्छिन्नैकभेदनिवेशासंभवात् अत्रकल्पे व्यधिकरण
धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वसमनियतप्रतियोगिताकस्यपर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्ना
भावस्यपर्वताद्यवृत्तिमहत्त्वेधूमाद्यावभावादेकमात्रवृत्तित्वेतावपिताहृशप्रतियोगिताकस्यएतत्क्षणावच्छिन्न
वृत्तित्वएतदन्यक्षणावच्छिन्नवृत्तित्वोभयत्वाद्यवच्छिन्नाभावस्यएतत्क्षणाद्यनवच्छिन्नवृत्तौवृत्तिमतिवर्त्तमान
स्याभावादसंभवः तादृशाभावस्यावर्त्तनायसामान्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वनिवेशेऽश्वगोत्वंपर्व
तद्वृत्तित्वत्वादिनाऽन्यगवृत्तित्वसामान्याभावव्यावृत्त्यसंभवश्चेत्सतःकल्पांतरमनुसरति तत्साध्याभावेति अतिरिक्ता त्व
तानिवेशेव्यधिकरणधर्मावच्छिन्नाभावमात्रस्यसंग्रहाय्यप्तिवारिमात्रेऽतिव्याप्तिरितितन्निवेशनं यद्यपियथाश्रु १२५

तेनानेनमहानसवृत्तित्वत्वादिनाधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभाववारणंनसंभवति महान
सादिनिरूपितत्वविशिष्टवृत्तित्वस्यसाध्याभाववन्निरूपितत्वविशिष्टवृत्तित्वत्वरूपस्याभाववद्वृत्तित्वत्वान्य ध्या
त्वविरहात् तथापिसाध्याभाववद्वृत्तित्वत्वानिरूपितसमानाधिकरणधर्मनिरूपितावच्छेद्यत्वशून्यत्वस्याध्या
नवच्छिन्नत्वात् तेनविवक्षणान्नदोषः महानसवृत्तित्वत्वादिनिरूपितावच्छेद्यत्वस्यसाध्याभाववद्वृत्तित्वत्वरूपविशि
ष्टपदार्थानिरूपितत्वात् नन्वेवमपिसाध्याभाववन्महानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणमशक्यं तादृश
धर्मानिरूपितावच्छेद्यतायांतद्घटकसाध्याभाववद्वृत्तित्वत्वनिरूपि[illegible]वधिकंत्विमादिमायेनजमादृत
त्वादितिवाच्यं गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वस्यामहानसादिवृत्तित्वत्वसमनियतायद्दर्शितगुरु
धर्मस्याभावप्रतियोगितानवच्छेदकत्वात् अथगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेसाध्याभाववयदस्य
साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावपरतयाधूमवान्वह्नेरित्यादावतिव्याप्तिः धूम

१२६ त्वाद्यवच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वत्वस्य समनियतधूमत्वाद्यवच्छिन्नाभाववद्वृत्तित्वत्वा
पेक्षया गुरुत्वेनाभावप्रतियोगितावच्छेदकत्वविरहेण तदवच्छिन्नाभावाप्रसिद्धिः धूमत्वाद्यवच्छिन्नाभाववद्वृत्ति
त्वत्वावच्छिन्नप्रतियोगिताया अपि धूमत्वावच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वत्वरूपविशिष्टपदार्था
नवच्छिन्नतया तन्निरूपकाभावस्य निरुक्ताभावविशेषणानाक्रांतत्वेन अधिकरणधर्मावच्छिन्नप्रतियोगिता
कस्य साध्याभाववद्वृत्तित्वाभावस्यैव लक्षणघटकत्वात् यदि च साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक
न रूपावच्छिन्नप्रतियोगिताकाभावस्यैतेन रूपेण निवेशः अपि तु तत्तदभावत्वेनैव एतदेव स्वरसयितुं तत्तत्सद्
मुपात्तं एवं च तत्तद्व्यक्तित्वेन धूमाभावघटिततदभाववद्वृत्तित्वत्वाद्यवच्छिन्नाभावस्य लक्षणघटकतया न धू
मादिसाध्यकेतिव्याप्तिरित्युच्यते तथापि घटभिन्नप्रमेयत्वादित्यादावतिव्याप्तिः तत्तद्व्यक्तित्वेन रूपेण घटभेदा १२६
भावघटिततद्व्यक्तिमद्वृत्तित्वत्वापेक्षया लघोस्तत्समनियतस्य किंचिद्विशेषणानवच्छिन्नघटत्वघटितस्य घट

वृत्तित्वत्वस्यैवाभावप्रतियोगितावच्छेदकतया तद्व्यक्तिमद्वृत्तित्वत्वावच्छिन्नाभावाप्रसिद्धेः घटवृत्तित्वत्वाव-
च्छिन्नप्रतियोगितायाः साध्याभाववद्वृत्तित्वत्वरूपविशिष्टपदार्थानवच्छिन्नतया तन्निरूपकाभावस्य लक्षण
घटकत्वासंभवाद्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावस्यैव तथात्वात् यदि चाभावध
र्मविशेषणविधया न निवेशोऽपि तु अभावप्रवृत्तिरेव अभावे तु साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छे-
दकरूपावच्छिन्नप्रतियोगिताकत्वमुपलक्षणविधया निवेश्यते एतच्चाभाग्येव तत्र सदोपादानमपि न तु
तत्तद्व्यक्तित्वेनाभावनिवेशलाभार्थमुपलक्षणीभूतप्रतियोगिताविशेषणेनैवाभावान्तरव्यावृत्तिसंभवे
तत्तद्व्यक्तित्वस्योपलक्षणतया निवेशप्रयोजनविरहात् एवं च घटवृत्तित्वत्वावच्छिन्नाभावोऽप्युक्तस्थले लक्ष
णघटको घटभेदाभावस्य घटत्वस्य तत्प्रतियोगितावच्छेदकघटकत्वात् प्रतियोगिताविशेषोपलक्षिताभा
ववद्वृत्तित्वत्वपर्याप्तनिरूपकताकाभावत्वपर्यन्तानिवेशात् धूमादिसाध्यकस्थले निर्धूमवृत्तित्वत्वावच्छिन्ना-

१२७ भावस्यप्रतियोगितावच्छेदकशरीरेभावविशेषणस्याधिकस्यनिवेशेपिनक्षतिः नन्वाभावप्रतियोगिकोटौउ
पलक्षणतयाभानस्यानुभवविरुद्धत्वाविशिष्टनिरूपितत्वाभावरूपस्यनिरूपितत्वसंबंधावच्छिन्नविशिष्टा
भावरूपस्यवाविशिष्टानिरूपितत्वस्यप्रतियोगिकोटौप्रतियोगिताविशेषस्यकथमुपलक्षणविधयानिवेश
इतिवाच्यं प्रतियोगितासंसर्गकज्ञानएवतादृशाभावस्यतथात्वात् जात्यवच्छिन्नप्रतियोगिताकाभावबुद्ध्या
द्याकारकस्वरूपतोघटत्वाद्यवच्छिन्नप्रतियोगिताकाभावभानस्यासर्वसम्मतत्वात् प्रकृतेचसाध्यतावच्छेदका
वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकोयोभावस्तद्वृत्तित्वत्वानिरूपितत्वप्रतियोगिताका
ध भाववतःसमानाधिकरणधर्मावच्छिन्नत्वस्ययोभावस्तत्प्रतियोगितायायावंतोभावास्तद्धेतुरित्याकारक
व्याप्तियद्देप्रतियोगितायाविशेषणत्वेनानुपपत्त्यभावात् अतएवव्यापकतावच्छेदकत्वादेरप्युपलक्षण
विधयाभानोपपत्तिः नन्वेतादृशानिरूपितत्वप्रतियोगिताकस्यतत्वावच्छिन्नप्रतियोगिताकस्यवाभावस्य १२७

निवेशे निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावप्रतियोगितानिष्ठावच्छेद्यतायामपि किंचिद्विशिष्टतादृशनिरूपितत्वाव
च्छिन्नाभावसत्वात्तादृशाभावाप्रसिद्ध इति वाच्यं तत्तदभाववद्वृत्तित्वत्वनिरूपितत्वपर्याप्तप्रतियोगितावच्छेदकाता त्व
काभावस्यैव निवेशनीयत्वात् एवं च तत्तद्व्यक्तित्वेनाभावनिवेशाद्गौरवेण तत्तत्पदोपादानमपि साधु संगच्छते इ
त्युच्यते तदापि घटत्वभेदादिसाध्यकेव्याप्तिवारिणि अतिव्याप्तिवारणाय मत्राकं निर्विशेषणैकघटत्वादिवृत्तित्वत्व
स्यैव तत्र घटत्वादिवृत्तित्वाभावप्रतियोगितावच्छेदकतया घटत्वत्वादिरूपसाध्याभावस्य प्रतियोगितावच्छेदकशा
रीरे निवेशेनाधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् न च जातेः समवायेनैव स्वरूपतोवच्छेदकत्वं
न तु संबंधान्तरेण अत एव गोत्वादिजातिनिष्ठव्याप्तौ पदविशेषप्रवृत्तिनिमित्तत्वाद्वृत्तासमवेतत्वादेरवच्छेद
कत्वं स्वीकुर्वन्ति न तादात्म्यसंबंधेन जघोरपि गोत्वादिजातेरिति निर्विशेषणैकघटत्वादिघटितस्याभावप्रतियो
गितावच्छेदकत्वं न संभवतीति वाच्यं तादृशनियमे मानाभावात् यद्वाभावांशस्योपलक्षणत्वं स्वीक्रियते तदा

ति॰ एवं साध्याभाववद्वृत्तितान्त रीरेअभावाद्विशेषणतया संबंधे वृत्तिमद्वृत्तिपदमनर्थकं आपद्यते। व्यधिकरणध
गदा॰ र्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावत्वप्रतियोगितायाश्चावच्छेदकवृत्तित्वेन वच्छिन्नतयात

१२८

मद्दानसवृत्तित्वत्वाद्यवच्छिन्नाभाववारणमशक्यमेवपदि च साध्याभावानिरितिकविशेषणाविशिषिताधिक
रणवृत्तित्वत्वाद्यवच्छेद्यताकजिन्नसमानाधिकरणधर्मावच्छेद्यत्वाभावनिवेशाविशेषितघटत्वादिविशेषिवृत्ति
वृ त्वाभावः संगृह्यते तदा तादृशाभावमादायजातिसाधारणसद्धेतौ व्याप्तिर्दुर्लपायते अत्रवदंति गुरुधर्मास्या
भावप्रतियोगितावच्छेदकत्वमते नेदमनिर्दितं व्यधिकरणधर्मावच्छिन्नसाध्याभाववत् मद्दानसवृत्तित्वत्वा
त्त द्यवच्छिन्नाभाववारणायच्च साध्याभाववद्वृत्तिर्वपर्याप्तावच्छेदकताभिन्नसमानाधिकरणधर्मनिष्ठावच्छेदक
त्वानिरूपकत्वमेवप्रतियोगितायांविशेषणंदेयं नन्वेवंघटत्वादिनासाध्याभाववद्वृत्तित्वाभावसंग्रहकंस
मानाधिकरणपदोपादानंनिषेधद्वयनिवेशनंचविफलंतादृशाभावस्यासंग्रहेपिकेवलान्वयिसाध्यकेसाध्या
त्वे भाववद्वृत्तित्वेनघटाभावमादायलक्षणसमन्वयसंभवादिनिवाच्यं विषयतादिसंबंधेनयत्रहेतुतात्त्रहेतु
तावच्छेदकसंबंधेनसाध्याभाववतिवृत्तेः साध्याभाववद्विषयतादिरूपायाविषयादिस्वरूपत्वेनसाध्याभाव

१२८

वद्विषयतात्वादिरूपसाध्याभाववद्वृत्तित्वत्वस्य केवलान्वयितया तदवच्छिन्नाभावाप्रसिद्धेः तादृशाभावघटित
लक्षणानुपपत्तेः नन्वसाध्याभाववद्विषयतात्वादिकं येन संबंधेन वृत्ति तेन संबंधेन तदवच्छिन्नाभावमादाय
लक्षणसमन्वयः संभवतीति वाच्यं कालिकसंबंधेन साध्याभाववद्वृत्तित्वत्वावच्छिन्न॰ योभावस्तस्य ध्वंसाधिक
रणहेत्वव्यापकतया स्वरूपसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्यावश्यं निवेशनीयतया व्यधिक
रणसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य लक्षणघटकत्वासंभवात् विषयताया ज्ञात्वादिरूपत्वे
पि विषयतात्वविशिष्टस्य न समवायादिना वृत्तिः तादृशस्य स्वभिन्नेव वृत्तेर्ज्ञानादौ तत्समवायाभावात् किंतु स्व
रूपसंबंधेनैव एवं च समवायादिसंबंधावच्छिन्नप्रतियोगिताक एव विषयतात्वाद्यवच्छिन्नाभावो लक्षण
काल घटकोभविष्यत्यपि नं तन्नानादिरूपहेतौ कालिकविषयितादिसंबधावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृ
त्तित्वत्वावच्छिन्नाभावस्यासत्वेन स्वरूपसंबंधावच्छिन्नप्रतियोगिताकाभावस्यैव निवेशनीयत्वात् नन्वेवं सा

ती

गदा॰

१२९ ध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नाभावस्यापि तत्राप्रसिद्धिर्गगनत्वाघटत्वादेः साध्या
भाववद्विषयतानिष्ठप्रतियोगितावैयधिकरण्यासंभवादिति वाच्यं घटत्वादिनापटाद्यभावस्यैव तथात्वात्
अथैवमपि सामानाधिकरण्यमुपेक्ष्य साध्याभाववद्वृत्तित्वनिष्ठत्वेन धर्मविशेषणे कस्यो घटत्वादेर्घटादिस्वरूप
साध्याभाववद्विषयतानिष्ठत्वेन गगनादेरपि स्वनिष्ठविषयतात्मकत्वेन साध्याभाववद्विषयतानिष्ठतया सा
ध्याभाववद्वृत्तित्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नाभावाप्रसिद्ध्याउक्तस्थलेव्याप्तिर्दुर्वारैव येन रूपेण
यत्साध्याभाववद्वृत्तित्ववृत्तितद्रूपविशिष्टतदनवच्छिन्नप्रतियोगिताकाभावविवक्षणे गगनत्वविशिष्टगग
नात्वविशिष्टगगनाद्यवच्छिन्नाभावस्य लक्षणघटकतानिर्वाहेपि हेतुनिष्ठव्यधिकरणधर्मावच्छिन्नसाध्या
भाववद्वृत्तित्वस्य केः किंचिद्विशेषितत्वत्राघटकीत्वावच्छिन्नप्रतियोगिताकाभावस्य तथाविधस्य देतावम १२९
त्वादसंभवप्रसंग इति चेन्न येन संबंधेन तद्वत्तातेन संबंधेन तन्निष्ठावच्छेदकताकान्यत्वस्य तदनवच्छिन्नत

स्यविवक्षणीयतयासंयोगादिसंबंधेनघटत्वाद्यवच्छिन्नप्रतियोगिताकाभावमादायोक्तस्थलेलक्षणसमन्व
यसंभवात् उक्तार्थलाभायैवसाध्याभाववद्वृत्तित्ववृत्तिवद्वृत्तित्वोपादानं नतुतदपिलक्षणघटकंप्रयोजना
भावात् सर्वत्रदर्शिताभावमादायैवलक्षणसमन्वयसंभवेनसमवायादिसंबंधेनघटत्वाद्यवच्छिन्नस्यसा
ध्याभाववत्संयुक्तत्वाद्यभावस्यलक्षणाघटकत्वेपिक्षतिविरहात् एतेनधूमत्वत्वाद्यवच्छिन्नधूमत्वाद्यभा
स्यधूमत्वप्रकारकप्रमाविषयत्वत्वाद्यवच्छिन्नाभावस्यवसाध्याभाववत्वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियो
गिताकस्यवारणायप्रतियोगितायांसाध्याभाववद्वृत्तित्वनिष्ठत्वंविशेषणमथनादेयं अतएवस्वसमाना
धिकरणत्वस्यप्रतियोगितावच्छेदकत्वविशेषणत्वकल्पनापेक्षयालाघवमेवैतत्कल्पानुसरणबीजभूतं
निष्प्रत्यूहमिति यदित्वगुरुधर्मानवप्रतियोगितावच्छेदकस्तदामदानसद्वृत्तित्वत्वाद्यवच्छिन्नाभाववा
रणायसाध्याभाववद्वृत्तित्वत्वातिरिक्तत्वेनेनसाध्याभाववद्वृत्तित्वत्वाद्यघटकत्वमेवविवक्षणीयं तदर्थश्च।

१३० स्वाविषयकप्रतीतिवृत्तिसाध्याभाववद्वृत्तित्वरूपविशिष्टनिरूपितविशिष्टनिरूपितविषयिताकत्वं एवंवस्तु
त्व द्वृत्तित्वावच्छिन्नवृत्तेरभावोपि लक्षणघटकइतिवृत्तिमद्वृत्तिपदसार्थक्यं स्वाविषयकत्वं चेतरविशेषणता-
नापन्नस्वविषयिताशून्यत्वं अतो विशेषणविधया साध्याभाववद्वृत्तित्वघटकसाध्याभाववत्त्वादेरपि तद्घट-
कत्वनिर्वाह इति पूर्वोक्तदोषानवकाशः स्वरमापि विषयिता इतरविशेषणतानापन्ननिरूपितैव ग्राह्या तेन
वृत्तित्वत्वादिविशेषणकताने साध्याभाववद्वृत्तित्वत्वादेर्विशेषणतया विषयत्वेपि वृत्तित्वत्वादेर्न साध्याभावव-
त्व द्वृत्तित्वघटकत्वं न च साध्याभाववद्वृत्तित्वघटकधर्मपर्याप्तप्रतियोगितावच्छेदकताकोभावो निवेश्यतां
घटकतार्थश्च स्वाविषयकप्रतीत्यविषयवृत्तिसाध्याभाववद्वृत्तित्वरूपविशिष्टनिरूपितविषयिताकत्वं ननु
स्वाविषयकप्रतीत्यविषयतादृशविशिष्टकत्वं तत्तद्भाववद्वृत्तित्वादि॰ येन तया तद्भाववन्निरूपीतत्वविशिष्टा-
धेयतात्वे तद्विषयकप्रतीत्यविषयत्वस्य दुर्घटतया तद्भाववद्वृत्तित्वादेस्तद्घटकत्वानिर्वाहात् केवलाधेय १३०

ता कप्रतीतौ केवलाधेयतात्वस्याविषयतया

×स्यादेपत्तेरितिवाच्यं तथासति उक्तरीत्याविषयितासंबंधेन यत्तद्धेतुतावच्छेदकत्वाभावप्रसिद्धेः घटत्वभिन्नं प्रमेयत्वादिमादाय ×१

नात्वस्य च तद्घटकतया वृत्तिमद्वृत्तित्वेन रूपेण घटाद्यभावमादायातिव्याप्तेः निर्विशेषणैकघटत्वादिवृत्तित्वत्व
स्य यथा समानाधिकरणधर्मावच्छिन्नाभाववद्वृत्तितावघटकत्वं तथावाच्यं प्रमेयत्वादिसाध्यावपि तादृशस्य स्वाविषय
कप्रतीत्यवृत्तिअधिकरणधर्मावच्छिन्नसाध्याभावविशेषितघटत्वादिघटिततदभाववद्वृत्तित्वत्वरूपविशिष्टनिरू
पितविषयिताकतया तदभाववद्वृत्तित्वत्वघटकतया वृत्तिमद्वृत्तितदवच्छिन्नाभावस्य हेतावसत्त्वेनाव्याप्तेः
तत्तदभाववद्वृत्तित्वत्वाघटकधर्मावच्छिन्नाभावनिवेशेनैव वारणसंभवात् तादृशधर्मे निरुक्तसाध्याभाववद्वृत्तित्व
त्वघटत्वस्य तु अपि स्वाविषयकप्रतीत्यवृत्तिसाध्याभाववद्धर्मेतरवृत्तित्वविषयिताकत्वेन साध्याभाववद्वृत्तिताघ
टकत्वस्यापि सत्वेन तदवच्छिन्नाभावस्य यथा निरुक्ताभावानात्मकत्वात् न च स्वाविषयकप्रतीत्यवृत्तितदभा
ववद्वृत्तित्वत्वनिरूपितविषयितासामान्यकत्वरूपतत्तदभाववद्वृत्तित्वत्वघटकतानिवेशे निर्विशेषणैकघटत्वा
दिवृत्तित्वस्य साध्याभाववद्वृत्तित्वत्वघटकत्वाप्रसक्त्या तद्घटधर्मावच्छिन्नाभावनिवेशेऽपि संभवतीति वाच्यं

त्व

१३१ तथा सति व्यापकताघटितसामान्यपदार्थनिवेशेनैतद्घटधर्मानवच्छिन्नाभावनिवेशापेक्षया गौरवात् समाना
धिकरणपदसार्थक्यं तूक्तरीत्यैवेति ध्येयं केचित्तु व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन पर्वतादिवृ
त्तित्वघटान्यतराद्यभाववारणाय एतन्मतेपि व्यापकतात्साध्याभाववद्वृत्तित्वत्वकत्वं प्रतियोगिताविशेषणमा
वश्यकं तथा च साध्याभाववद्वृत्तित्वत्वेन घटाभावस्य लक्षणाघटकतानसंभवतीति निषेधद्वयनिवेशनसमानाधि
करणपदोपादानयोः सार्थकतेत्याहुः प्रतियोगितायां साध्याभाववद्वृत्तित्वव्यापकत्वनिवेशप्रयोजनमाह
आलोकाद्यवृत्तित्वेनेति वह्निसामान्याभाववद्वृत्तित्वस्य योभावस्तस्य धूमादावसत्वेपीत्यन्वयः वह्निसामान्या
भावैः साध्याभाववद्वृत्तित्वव्यापकतानिवेशनप्रयोजनमाह यत्रेति इंधनत्वाद्यवच्छिन्नेति साध्यतावच्छेद
कावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्यैव लक्षणघटकतया घटत्वाद्यवच्छिन्नाभा
वोपेक्षणं महानसवृत्तित्वादेरभावद्वयं च महानसवृत्तित्वत्वादिनेति बोध्यं तादृशाभावाधिकरणमहानसवृ १३१

छिन्नत्वपर्यन्तानुसरणे संदर्भविरोध इति वाच्यं। अधिकरणत्वांशस्योपलक्षणविधया आधारस्य विशेषणतया वा वृ
त्तित्वत्वाद्यवच्छिन्नतादृशवृत्तित्वनिष्ठप्रतियोगिताकत्वं वा पर्यन्तार्थः नन्वगुरुधर्मस्याभावप्रतियोगितानवच्छेदक
त्वेऽपि तादृशाभावाविशेषितमहानसवृत्तित्वत्वावच्छिन्नाभावमादाय दोषप्रसक्तेस्तद्विशेषितमहानसवृत्तित्वत्वा
वच्छिन्नेनानुपपत्त्यभावात् अधिकरणविशेषानुपर्क्तवृत्तेरभावमादायापि दोषं दर्शयति स्वनिष्ठेति साध्याभाव
वद्वृत्तित्वप्रसक्तेस्तत्प्रसक्तित्वावच्छिन्नाभावस्येत्यर्थः द्वित्वेतरवृत्तेः आलोकादिवृत्तेः एतेन वृत्तिमद्वृत्तित्वमस्तीति सू
चितं स्वस्मिन् धूमादौ अत्र च लक्षणे सत्ताभाववान् द्रव्यत्वादित्यादौ सत्तावत्समवेतत्वाभावस्य व्यधिकरणधर्मा
वच्छिन्नप्रतियोगिताकस्यैव समवेतवृत्तित्वेऽपि द्रव्यावृत्तित्वाद्यवच्छिन्नाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्याप
कतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तद्वत्समवेतत्वा
भावस्य समवेतगुणत्वादिवृत्तितया द्रव्यत्वादौ सत्त्वाभावान्नातिव्याप्तिः एवमवृत्तिसाध्यकस्थलेऽपि साध्यतावच्छेद
कावच्छिन्नव्यापकत्वाप्रसिद्ध्या नातिव्याप्तिः कूटघटितलक्षणे च तत्र तत्रातिव्याप्तिवारणाय साध्यसमानाधिकर

णत्वेसतीतिविशेषणंदेयं तच्चलक्षणेऽव्याप्तिहेतुकेतिमोवारणाय वृत्तिमत्त्वमात्रमुपादेयं कूटघटितलक्षणवद्
त्रापिसद्राकाशान्योघटादित्यादावतिव्याप्तिर्दुष्टत्वा किंतुतदन्यदोषाणामेवात्रानवकाशइत्यवधेयं अन्येपि
त्विति घटत्वेननिर्धूमवृत्तित्वाद्यभावमादायव्यभिचारिणिपतिव्याप्तिर्यावत्त्वोपादानं एवंच केवलान्वयिनःसाध्य
स्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्यप्रसिध्यातत्समुदायवारणाय x याधिकरणजगद्वृत्तित्व
स्याप्रसिद्धेः समानाधिकरणधर्मावच्छिन्नाभावोपियावदभावांतर्गतइतितदत्वविरहात्तादृशसाध्यकेविष
यिताव्यतिरिक्तसंबंधेनहेतावव्याप्तिः साधनसमानाधिकरणत्वेनसाध्याभावविशेषणपक्षेचव्यतिरेकिसाध्य
स्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यैवाभावस्यसद्धेतोलक्षणघटकतयाजगतएवतत्कूटाधिकरणत
याव्यतिरेकिसाध्यकेपिविषयितातिरिक्तसंबंधेनहेतावव्याप्तिरितिवृत्तिमद्वृत्तित्वमभावविशेषणं तादृशवृत्ति
त्वेति साध्याभावसमुदायाधिकरणवृत्तित्वइत्यर्थः प्रयोजनंचेति पूर्वदलप्रयोजनंआकाशाद्यवृत्तित्वेननिर्वह्नि १३२

घटादिवृत्तित्वाभावमादायाव्याप्तिवारणमवनः वह्निमान्धूमादित्यादौ महानसवृत्तित्वाद्यभाववत्त्वावर्तितंतत्रमहानसा

वृत्तित्वाभावमादाय वह्निमान्धूमादित्यत्राव्याप्तिवारणाद्रूपं पूर्वलक्षणे उक्तमेवत्वरमदलप्रयोजनंतुसाधन
समानाधिकरणत्वस्यसाध्याभावाविशेषणत्वे केवलान्वयिसाध्यके तेयत्वादिदेतौघटादेर्वृत्तित्वाद्यवच्छिन्नवन्त्य
भावानधिकरणत्वेनसाध्याभावकूटानधिकरणत्वात् एतस्यचप्रागुक्तत्वात् उक्तप्रायमिति समुदायप्रदत्त
प्रयोजनमाह साध्याभावाधिकरणेति यधिकरणधर्मावच्छिन्नाभावस्यैवेति निर्धूमवृत्तित्वत्वाद्यवच्छिन्ना
निर्धूमवृत्तित्वाभावस्यप्रतियोगिताया व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणमदानृसिंहवृत्तित्वावृत्तिता
यासाध्याभावाधिकरणवृत्तित्वत्वाव्यापकतयाजगद्वृत्तित्वसामान्याभावस्यैवतद्व्यापकप्रतियोगिताकतया
तस्यचसमा[illegible]रणधर्मावच्छिन्नप्रतियोगिताकस्याद्वत्तावेवप्रसिद्धत्वादितिभावः यनिवारिएप्तिव्याप्तिरि
ति तादृशजगद्वृत्तित्वाभावस्यसर्वत्रसत्वादितिभावः अत्रचस्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्व
त्वकत्वे सति साध्याभावसमुदायाधिकरणवृत्तित्वत्वव्यापकत्वंप्रतियोगिताविशेषणं तत्रचशेषदलेसमुदा

१३२ वेशेपि निर्धूमवृत्तित्वत्वाद्यवच्छिन्नाभावस्य लक्षणाघटकत्वेपि नातिव्याप्तिः संभवति व्यतिरेकिसाध्यके तादृशप्र
तियोगिताया एवाप्रसिद्धेः जगद्वृत्तित्वसामान्याभावप्रतियोगितायाः साध्याभावाधिकरणवृत्तित्वव्यापकत्वे
पि स्वव्यापकसाध्याभावसमुदायाधिकरणवृत्तित्वत्वकत्वरूपपूर्वदलविरहात् धूमाद्यभावसमुदायाधिक
रणवृत्तित्वत्वशून्यमहानसादिवृत्तित्वेपि तादृशप्रतियोगितासत्त्वादिति पूर्वपक्षयितात्रशेषदले समुदायाप्रवेशे
पूर्वदलमेव नोपादेयं तदनुपादानेपि वह्निमान् धूमादित्यादावालोकाद्यवृत्तित्वाद्यवच्छिन्नाभावप्रतियोगि
त्वस्यालोकनिष्ठस्य तादृशसाधारणसाध्याभावाधिकरणवृत्तित्वव्यापकतया तादृशाभावमादाय दोषा
प्रसक्तेः तदनुपादाने व्यतिरेकिसाध्यकमात्र एवोक्तरीत्या तादृशप्रतियोगित्वाप्रसिद्धाव्याप्तिप्रसंगाच्च तथा
च धूमवान् वह्नेरित्यादौ घटत्वेन जगद्वृत्तित्वाभावमादाय अतिव्याप्तिरिति तदाशयेन दीधितिकृतेदमभिहितं
अतिव्याप्तिवारणाय शेषदले समुदायप्रवेशे च तु निर्वह्निवृत्तित्वत्वव्यापकप्रतियोगिताकस्यालोकावृत्ति १३३

प्रति

त्वावच्छिन्नाभावस्य वह्निमान् धूमादित्यत्र शेषदलाक्रांततया पूर्वदलोपादानमावश्यकं तच्च समुदायाप्रवे
शे व्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वव्याप्यप्रतियोगिताकस्य लोकोरवृत्तित्वाभावस्य प्र(त्वद्युगवच्छि
मेऽसत्त्वादव्याप्तिरिति तत्रापि तन्निवेशनमिति केचित् तस्मादधति परे तु प्रतियोगित्वव्या-कताविशेष्यताप
न्नमेव साध्याभावसमुदायाधिकरणवृत्तित्वं व्यापकत्वे विशेषणविधया निवेश्यते न तु तद्दलस्योक्तरीत्या द्वि
धा निवेशः एवं च पूर्वपक्ष एवायं नावतरति न च गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे प्रतियोगित्वव्या
पकत्वविशेषितसाध्याभावसमुदायाधिकरणवृत्तित्वाधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्व
त्वं नाभावप्रतियोगितावच्छेदकमिति तादृशावच्छेदकत्वत्वावच्छिन्नाभावरूपव्यापकतानिवेशसंभवात्
तद्दलस्य द्विधा निवेशनमावश्यकमिति वाच्यं व्यापकत्वे [illegible]लक्षणविधया साध्याभावसमुदायाधिकरणवृ
त्तित्वस्वरूपव्याप्यांशे निवेशसंभवात् व्यापकतावच्छेदकावच्छिन्नाभाववानित्यादिना नेव्यापकत्वांशे[illegible]वे।

१३४ क्तावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकाभावबुद्धौ व्यापकतायाउपलक्षणतयाभानेविरोधात् वस्तुतस्तु
गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेसाध्याभावसमुदायाधिकरणवृत्तित्वत्वाधिकरणनिष्ठान्योन्याभा
वप्रतियोगितावच्छेदकत्वमपिनाभावप्रतियोगितावच्छेदकंवह्नित्वाद्यवच्छिन्नवह्न्यभाववद्वृत्तित्वनिष्ठान्यो
न्याभावप्रतियोगितावच्छेदकत्वादिरूपसमनियतधर्मापेक्षयाप्यधिकरणधर्मावच्छिन्नसाध्याभावेनाधि
केनघटितस्यगुरुत्वादितितादृशधर्मावच्छिन्नाभावोनिवेशयितुंनशक्यः किंतुतादृशान्योन्याभावप्रतियो
गितावच्छेदकंयद्यत्तदवच्छेदकरूपमेवनिवेशनीयं एवंचप्रतियोगिताव्यापकत्वघटितोक्तधर्मस्यप्रतियोगितानवच्छे
दकत्वमकिंचित्करमेवेत्याहुः तेनेति समवायेनवह्नेःसाध्यत्वेपर्वतस्यवंशद्वयावच्छिन्नवह्न्यभावद्वयानधि
करणत्वेपिधूमेनातिव्याप्तिः संयोगेनवह्नेस्तथात्वेवह्न्यवयववस्यवृत्तताशून्याभावद्वयानधिकरणत्वेपिवह्न्यव १३५
यवत्वेनातिव्याप्तिः समवायेनवह्नेःसाध्यत्वेसंयोगेनतयात्वेचपर्वतस्यवह्न्यवयववस्यवृत्ततादृशाभावद्वयानधिकर

णत्वेपि पर्वतवन्ह्यवयवसंयोगेनातिव्याप्तिरितियोजना। संबंधद्वयावच्छिन्नवन्ह्यभावद्वयं संयोगसंबंधावच्छि
न्नवन्ह्यभावसमवायसंबंधावच्छिन्नवन्ह्यभावद्वयं साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वानिवे
शे तादृशाभावद्वयानधिकरणस्यपर्वतादेः साध्याभावकूटानधिकरणतया कूटाधिकरणवृत्तित्वाभावा
यावंतस्तद्वत्वं धूमादावव्याहतमेवेत्यतिव्याप्तिःस्यादितिभावः ननुसाध्यतावच्छेदकसंबंधावच्छिन्नाभावा
निवेशेपिसमवायेन वन्हेःसाध्येसंयोगेनहेतौधूमेनातिव्याप्तिर्वारयितुंशक्यते समवायसंबंधावच्छिन्नव
न्ह्यभावकूटाधिकरणसंयुक्तत्वस्यत्वधिकरणधर्मावच्छिन्नाभावस्यैवसंयुक्तवृत्तित्वात् वन्ह्यवयवमात्रसं
युक्तपदार्थाप्रसिद्धेःसंयुक्तमात्रस्यैवतादृशाभावकूटाधिकरणगगनसंयुक्तत्वादितिकथमत्रव्यावृत्ति
प्रदर्शनं समवायेनधूमहेतुकस्थलपरतान्वनयुज्यते समवायेनधूमवतःसाध्याभावकूटाधिकरणत्वा
निराकरणादितिवाच्यम् संयुक्तमात्रस्यगगनादिसंयुक्तत्वेपितादृशसंयोगस्यवृत्तिनियामकतयासंयो

१२५ गेनवन्ह्यवयवान्यत्वाभावस्यसंयोगेनवृत्तिमत्त्वेः सुयैलभ्यतयावृत्तिपदस्ययथ[illegible]तपरतामतेतादृशव्याप्ति
त्तिदानसंयोगेतेः वृत्त्यनियामकतादात्म्यादिसंबंधेनव्याप्तिस्वीकारेवृत्तिपदस्यसंबंधार्थकत्वमावश्यकंइत्यत्ति
प्रायेणएतदुपेक्ष्यद्वितीयस्यलानुसरणं साधनसमानाधिकर[illegible] साध्याभावविशेषणत्वपक्षेसमवा
साधन यादिसंबंधावच्छिन्नवन्ह्यभावस्यवन्ह्यवयवत्वरूपेसामानाधिकरण्याभावे॰ नतत्रातिव्याप्तिसंभवः एवंस
त्ताभाववानद्रव्यत्वात्इत्यादावतिव्याप्तिवारणायसाध्यासमानाधि[illegible]तीतिविशेषणप्रवेशस्या
वश्यकतयासंयोगादिनावन्हिमत्यवर्त्तमानेवन्ह्यवयवत्वादौतेनार्थातिव्याप्तिर्वारयितुंशक्यतइत्यन्यतः
पर्वतवन्ह्यवयवसंयोगहेतुकानुसरणंसंयोगेनद्रव्यस्याव्याप्यवृत्तितापक्षेपर्वतस्यसंबंधद्वयावच्छिन्नव
न्ह्यभाववद्याधिक णत्वेपिनतस्यव्याप्यवृत्तित्वविशिष्टसाध्याभावकूटाधिकरणत्वंव [illegible]णीयंवावश्यं १२५
तादृशसाध्याभावकूटाद्यवत्वं अन्यथाऽव्याप्यवृत्तिसंयोगादिसाध्यकस्यनिवारिणि[illegible] तएवसाध्याभा

व

षकूटाधिकरणत्वेनातिव्याप्तिरिति दर्शितं हेतोः पर्वतवृत्तित्वेपि तादृशाभावकूटाधिकरणवृत्तित्वाभावो
क्ष तएवेत्यतिव्याप्तिप्रसंगः पूर्वं दत्तसाध्याभावपदेन साध्यतावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्ना
के भावविवक्षणेनानाविपक्षे तथाविधतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावघटितकूटाधिकरणाप्रसिद्ध्याव्या
प्तिः साध्यतावच्छेदकविशिष्टसमव्यापकतावच्छेदकावच्छिन्नाभावनिवेशेनेगौरवमितिसाध्यतावच्छेदकस
मव्याप्तप्रतियोगिताकाभाव एव विवक्षितुमुचितः तार्णंतार्णेद्दनवृत्तित्वावच्छिन्नप्रतियोगिताकानां
तथाविधसाध्याभावानामधिकरणे धूमादेर्वृत्तावपि वह्नित्वाद्यवच्छिन्नत्वन्यभावघटिततादृशाभावकूट
वत्त्ववृत्तेरसाम्यनवकाशादित्याशयेन तथाविधमेवाभावं निवेशयति तथेति स्वप्रतियोगिता समनियता
भावैक्यमते साध्याभावप्रतियोगितायाः साध्याभावसमनियताभावप्रतियोगिपदार्थान्तरवृत्तित्वेपि सा
ध्यतावच्छेदकेन व्यधिकरणेन वा धर्मेणावच्छिन्नायाः साध्यमात्रवृत्तिप्रतियोगियोगितायाः साध्यतावच्छे

दकसमनैयत्यमस्तु तमेव अथ घटत्वाद्यवच्छिन्नायां वाच्यत्वनिष्ठप्रतियोगितायां घटादिभिन्नयावद्वस्तुवृत्तित्वरेकेव
व्य स्वीक्रियते न तु घ[illegible]त्वादिमात्रवृत्तित्वं तथा सति घटत्वेन प्रमेयत्वं नास्तीति प्रतीतिविषयप्रतियोगितान्तरकल्पने गौ
रवादिति तादृशप्रतियोगितायां न वाच्यत्वत्वादिरूपसाध्यतावच्छेदकसमनैयत्यमिति चेत् [illegible] तिः वाच्यत्वा
भिन्नत्वेन वाच्यत्वं नास्तीति प्रतीतिविषयमभावमादायैव तत्र लक्षणसमन्वयसंभवात् व्यधिकरणवाच्यत्व
भिन्नत्वावच्छिन्नायाः प्रतियोगितायाः वाच्यत्वभिन्नवृत्तित्वस्यासंभावितत्वात् वस्तुतस्तु घटत्वावच्छिन्नवाच्य
पां त्वाभावप्रतियोगितायामधिकरणघटत्वादेरिव समानाधिकरणवाच्यत्वत्वादेरपि अवच्छेदकत्वमावश्यकं घट
त्वेन वाच्यत्वं नास्तीति प्रतीत्या वाच्यत्वत्वादेः प्रतियोगितावच्छेदकत्वानवगाहनेन तादृशप्रतीतेर्वाच्यत्वत्वादिविशि
ष्टवैशिष्ट्यानवगाहित्वेन तत्र वाच्यत्वत्वादिप्रका[illegible] कल्पनानपेक्षापत्तेः एवञ्च घटत्वेन प्रमेयत्वं नास्तीत्यादिप्रती
तिविषयप्रतियोगितायां अतिरिक्तत्वमावश्यकं अवच्छेदकभेदादिति घटत्वेन वाच्यत्वं नास्तीत्यादिप्रतीतिवि १३६

ष्यप्रतियोगितावाच्यत्वादावेववर्त्ततेनत्वन्यत्रापिमानाभावादितिघटत्वेनवाच्यत्वाभावोपिलक्षणघटकः
अथैवंसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघटितलक्षणेवह्नित्वावच्छिन्नसाध्यस्यक
लेवह्नित्वादिनाघटाभावोलक्षणघटकोनस्यात् व्यापकतावच्छेदकवह्नित्वादिपर्याप्तप्रतियोगितावच्छेदकत्व
विरहात्महानसीयवह्नित्वाद्यवच्छिन्नाभाववारणायावच्छेदकतापर्याप्तिविव[illegible]ण्याव्यापकत्वादितिचेन्न
व्यापकतावच्छेदकपर्याप्तत्वंव्यापकतानवच्छेदकावृत्तित्वं तच्चेंधनत्वा[illegible]वच्छिन्नवह्न्यभावप्रतियोगितावच्छे
[illegible]दकतायामक्षतमितितादृशाभावमादायैवास्तुतल्लक्षणसमन्वयसंभवइति अतएवयस्त्रेंधनत्वावच्छिन्नव
ह्न्यभावाधिकरणीभूतम[illegible]नसादिवृत्तित्वादेरभावइतिदीधितिग्रंथःसंगच्छते अन्यथाइंधनत्वादिनाघटाद्यभा
वोपेक्षायांनिर्वीजतापद्येत एवंचसार्वभौमानामेतल्लक्षणेनिशायकतयासमवायितयावाच्यत्वाभावोघट
एवप्रसिद्धइतिमूलस्यग्रंथोपवर्णनंसंगच्छते अथपर्याप्तिसंबंधेनयात्रोभयत्वादिकंसाध्यतावच्छेदकंतत्रप्रति

१२७ योगितायां व्यासज्यवृत्तित्वेन तत्पर्याप्त्यधिकरणप्रत्येकमत्रो पर्याप्तिसंबंधेनोभयत्वादेरत्यंताभावस्य तद
वच्छिन्नभेदस्य चैसत्वात् तस्य प्रतियोगिताव्यापकत्वेन संभवति नवा व्याप्यवृत्तिसंयोगादेर्यत्र साध्यतावच्छेद
कता तत्र प्रतियोगिताव्यापकत्वनिर्वाहाय प्रतियोग्यसमानाधिकरण्यं व्यापकताघटकाभावे निवेशनीयं ता
वता उभयत्वस्य व्यापकत्वं निर्वहति पर्याप्तिसंबंधेनोभयत्वपर्याप्त्यधिकरणस्य प्रत्येकानतिरिक्ततया प्रत्येक
वृत्तेरुभयत्वाभावस्यापि प्रतियोगिसमानाधिकरणत्वादिति वाच्यं पृथिवीत्वघटत्वोभयत्वादिना यत्र साध्य
ता तत्र जातित्वाद्यवच्छिन्नाभावप्रतियोगित्वसमानाधिकरणस्य तादृशसाध्यतावच्छेदकाभावस्य प्रतियोग्यधि
करणावृत्तित्वविरहेण तादृशसाध्यतावच्छेदकस्य तादृशप्रतियोगिताव्यापकतापत्त्या तादृशाभावमादाय
तदवच्छिन्नसाध्यकसद्धेतुत्वप्रकारकप्रमाविषयत्वादिदे तत्रातिव्याप्त्यापत्तेः प्रतियोग्यनधिकरणवृत्तित्वस्यैव १२७
अभावे निवेशनीयतया उभयत्वाभावस्य व्यावर्तनासंभवात् तदभाववतः प्रत्येकं तदनधिकरणत्वात् तस्य च तदधि

त

करणताया अपिव्याप्यवृत्तित्वात् इतिचेन्न सामानाधिकरण्यस्याव्याप्यवृत्तितापक्षे प्रतियोगिसामानाधि
करण्याभावविशिष्टाभाववत्ताघटितव्यापकताया एव निवेशासंभवात् पृथिवीत्वादावुक्ताभाववत्तिपृथि
वीत्वत्वावच्छेदेन तदभावस्य प्रतियोगिसमानाधिकरणत्वविशिष्टत्वाद् तत्सामानाधिकरण्याभावविशिष्टत
दभाववत्त्वेनातिप्रसंगविरहात् उभयत्वाद्यभावस्य तदभाववत्येकैकस्मिन्नपि तत्सामानाधिकरण्याभावा
नभ्युपगमात् तत्सामानाधिकरण्यवच्छेदकस्य प्रत्येकानतिरिक्तत्वात् अथवा यन्निरूपितसाध्यतावच्छेदक
ताघटकसंबंधसामान्यप्रतियोगित्वाधिकरणयत्किंचिदनुयोगिकत्वाभाववत्त्वं तदन्यत्वमेव प्रतियोगितायाव्या
त्येका पकत्वं उभयत्वनिरूपितपर्याप्तौ च न प्रनुयोगिकत्वाभावः तदनुयोगिनः प्रत्येकानतिरिक्तत्वादिति यत्तु प्रा
चीनमते रूपादिसामान्याभावस्य रूपत ध्वंसतत्प्रागभावत्रयप्रतियोगिकतया रूपध्वंसादिसाध्यकरू
पादौ हेतावतिव्याप्तिः रूपादिसामान्याभावीयरूपध्वंसत्वावच्छिन्नप्रतियोगितायाः साध्यतावच्छेदकसमनिय

भावरूपध्वंसत्वावच्छिन्न

१३८ तत्वे न तद्घटिताभावकूटाधिकरणे वायोरूपादेरवृत्तेः न च रूपस्यापि रूपध्वंसात्मकरूपतया तद्घटितस्य रू
पसामान्याभावघटितकूटस्यापि यावतामेकाधिकरण्यमिति विवक्षया लक्षणघटकत्वात्तद्वति हेतोर्व्याप्त्या नोक्ता
तिव्याप्तिरिति वाच्यं रूपादीनां प्रत्येकं स्वध्वंसाभावरूपत्वेपि रूपादिध्वंसाद्यभावात्मकतया साध्यतावच्छेद
कसमनियतप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वादिति तन्न जलपरमाण्वादौ रूपध्वंसत्वावच्छिन्ना
भावबुद्धिनिर्वाहाय जन्यरूपत्वावच्छिन्नप्रतियोगिताकत्वकल्पनस्यावश्यकतया तत एव रूपादिसामान्या
भावस्यापि तत्त्वनीतिनिर्वाहात् रूपादिसामान्याभावे रूपध्वंसादिप्रतियोगिकत्वाभ्युपगमात् साधनस
मानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे तेनाप्युक्तस्थले रूपादिसामान्याभावस्यावर्त्तनात् स्वनिरू
पकाभावत्वसंबंधेन साध्यतावच्छेदकसमनियतप्रतियोगिताकूटाधिकरणत्वमेव निवेश्यं लक्षणस्य परि
ष्करणीयतया रूपादिसामान्याभावानधिकरणस्यापि जलपरमाण्वादेरुक्तस्थले तत्कूटाधिकरणत्वेना १३८

तिव्याप्तेरनवकाशात्स्वप्रतियोगितायाः प्रतियोगिस्वरूपत्वमते नानाव्यक्तिसाध्यकस्थले साध्यतावच्छेदक
समनैयत्यस्य प्रत्येकं प्रतियोगितायामसत्त्वेपि स्वावच्छेदकावच्छिन्नतदभावीयप्रतियोगितात्वेन समनैयत्य
स्याविवक्षणान्न दोषः तत्र वह्नित्वधूमत्वादिरूपप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितानामपि स्वावच्छेद
कवह्नित्वधूमत्वाद्यवच्छिन्नतदभावप्रतियोगितात्वेन वह्नित्वधूमत्वादिसमनैयत्यात् वह्नित्वाद्यवच्छिन्नव
ह्न्यादिस्वरूपप्रतियोगितानां द्रव्यत्वाद्यवच्छिन्नाभावीयवह्न्यादिस्वरूपप्रतियोगितात्मकतया तदवच्छेदक
द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताया घटादावपि सत्त्वात् न तत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितात्वेन
वह्नित्वादिसमनैयत्यमिति तदभावीयत्वविशेषणं तथा सति वह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेद
कावच्छिन्नप्रतियोगितात्वेन वह्नित्वादिसमनैयत्यमिति तदभावीयत्वविशेषणं तथा सति वह्नित्वाद्यवच्छि
न्नाभावप्रतियोगिताया घटादावसत्त्वान्नानुपपत्तिः यद्यप्येवमपि वाच्यत्वत्वादिसमनियतप्रतियोगिता
प्रसिद्धिर्दुर्वारैव अधिकरणधर्मावच्छिन्नाभावनामभिन्नतया वाच्यत्वादिस्वरूपवाच्यत्वभिन्नत्वाद्यवच्छिन्नाभा

गदा०   ॰प्रतियोगितात्मकतया पृथिवीत्वाभावत्वादिरूपतदवच्छेदकावच्छिन्नप्रतियोगिता

१२९ वीयप्रतियोगितावच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगितानां पटादावपि सत्त्वात् यत्किंचिदेकधर्मावच्छिन्नतदभावीयप्रति
योगितात्वेन समनैयत्यघटकसाध्यत्वविवक्षणे च पृथिवीत्वाद्यभावादिसाधकस्थले घटावृत्तित्वाद्यवच्छिन्नाभावत्वा
रग्रिमग्रन्थाकं तदभावीयपृथिवीत्वाभावादिरूपप्रतियोगितानां पृथिवीत्वाभावत्वाद्यवच्छिन्नाभावीयत्वे तथापि यद्धर्मा
वच्छिन्नप्रतियोगितात्वेन यदभावनिरूपितत्वं तादृशधर्मावच्छिन्नतदभावीयप्रतियोगितात्वेनैव साध्यत्वनिवेशान्न
दोषः पृथिवीत्वाभावत्वावच्छिन्नप्रतियोगितात्वेन पृथिवीत्वादिरूपाभावमात्रनिरूपितत्वं न तु घटावृत्तित्वावच्छिन्ना
२ भावनिरूपितत्वमिति यद्यपि पूर्वदलाप्रवेशे वह्न्यादिसाध्यके धूमादिहेतौ साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यता
वच्छेदकव्यापकप्रतियोगिताकतत्तद्घटावृत्तित्वावच्छिन्नाभावकूटाधिकरणत्वस्य गुणादौ प्रसिद्धत्वेपि तत्र हेतुतावच्छे
दकसंबंधेन हेतोरप्रसिद्ध्या व्याप्त्यसंभवः तथापि साध्याभावकूटवति तादृशहेतोरप्रसिद्ध्या व्याप्तित्वदल निवेशेपि स
त्तावान् जातेरित्यादौ वक्ष्यते इति स्थलांतरे कूटाधिकरणाप्रसिद्ध्या व्याप्तिवारणाय रूपं तस्य योजनमाह यत्र पृथिवीत्वा
भावादाविति तत्र हि पक्षेति घटपटादिरूपे इत्यर्थः तत्र सद्धेताविति तत्र साध्येयः स द्धेतुर्जलत्वादिस्तत्रेत्यर्थः नाप्रसिद्धिरित्य
नेनान्वयः यावतामेकाधिकरण्यं संभवति तावदभावसमुदायाधिकरणविवक्षायां तद्दोषासंभवेन स्थलांतरे व्याप्ति
माह पृथिवीत्वादाविति द्रव्यत्वादेः समवायेन

१२९

हेतुत्वेनातित्वाद्यवच्छिन्नाभाववद्घटितकूटाधिकरणे समवायेन वृत्तेरप्रसिद्ध्याऽतिव्याप्तेरनवकाशात् स्वरूपसं-
संबंधेन हेतुत्वानुसरणं साधनसमानाधिकरणत्वस्य साध्याभावविशेषणतापक्षे जातित्वाद्यवच्छिन्नाभावस्य-
साधनसमानाधिकरणतयावारणासंभवेपि प्रत्येकं साधनसमानाधिकरणजलाद्वृत्तिजित्वतेजोवृत्तित्वाद्यवच्छिन्न-
समवायावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणतायाः सामान्यादावेव सत्वादतिव्याप्तिर्दुर्वारैवेति ध्येयं द्वि-
तीयदलप्रयोजनमाह नापीति घटत्वाभावादिना साध्यतायां घटादावेव साध्याभावकूटाधिकरणत्वप्रसिद्धिरि-
त्युक्तमभावत्वादिनेति आदिपदात् प्रमेयत्वादिपरिग्रहः तत्तत्साध्येति घटत्वाभावपटत्वाभावादिरूपसाध्यस्य
यः साध्यतावच्छेदकव्याप्यप्रतियोगिताको घटत्वपटत्वादिरूपो भावस्तत्समुदायाधिकरणाप्रसिद्धेरर्थः यावतामेका-
धिकरण्यं संभवतीति विवक्षायामपि तादृशाभावसमुदायवति घटादावपि हेतोर्वृत्तेरव्याप्तिरेव नन्वयावताम-
भावानामेकाधिकरण्यसंभवस्तादृशाभावकूटाधिकरणं यद्यत्तावदन्यतमवृत्तित्वसमनियतप्रतियोगिताको

१४० कोभावोविवक्षणीयः घटवृत्तित्वावच्छिन्नाभावस्य उपदर्शितस्थलेनतथाजगतएवतादृशादन्यतमांतर्गतत्वात्
अपितुघटत्वादिनाजगद्वृत्तित्वसामान्याभावएववृत्तिमद्वृत्तिस्तथाविधोभावः तत्तदधिकरणान्यतमस्यैवतत्तदधि
करणवृत्तिशून्यत्वं ननुतत्तदधिकरणान्यतमत्वमतोनाप्रसिद्धिरितिवाच्यं एवमपिजातिप्रतियोगिकाभाववा
न्मेयत्वादित्यादौजातिमात्रस्यैवप्रत्येकंघटत्वपटत्वघटितत्वादृशतादृक्कूटाधिकरणतयाजातिमद्वृत्तित्वावच्छि
न्नाभावस्यापितादृशतयाप्रसिद्धेर्दुर्वारत्वादिति अत्रसाध्याभाववत्तायांसंबंधविशेषानिवेशेकालपरिमाणवान् ल
मेयत्वादित्यादावतिव्याप्तिः कालस्यापिकालिकसंबंधेनकालपरिमाणाभावाधिकरणतयाजगतएवसाध्या
भावकूटवत्त्वात् दैशिकविशेषणतासंबंधानिवेशेत्वघटत्वाभाववान्पटत्वादित्यादावव्याप्तिः घटत्वादेस्तेना
संबंधेनक्वचिद्वृत्तेस्तेनसंबंधेनतद्घटितकूटाधिकरणाप्रसिद्धेस्तेनसंबंधेनवृत्तिमत्त्वस्याभावविशेषणत्वेतुघट
त्वाभावादिसाध्यकेव्याप्तिवारिणिव्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः कालिकसंबंधावच्छिन्नप्र १४॰

तियोगिताके घटत्वाभावाभावे साध्ये आत्मत्वादिहेतावव्याप्तिश्च घटातिरिक्तवस्तुमात्रस्यैव दैशिकविशेषणतयासा
ध्याभावकूटवत्वात् साध्यनिरूपितप्रतियोगितावच्छेदकसंबंधनिवेशेप्ययमेव दोषः किंचिद्विशिष्टस्य तादृशसाध्य
स्य योऽभावस्तस्य दैशिकविशेषणतासंबंधावच्छिन्नाभावत्वरूप इति दैशिकविशेषणताया अपि निरूक्तसाध्यनिरू
पितप्रतियोगितावच्छेदकसंबंधत्वात् स्वनिष्ठतादृशप्रतियोगितावच्छेदकसंबंधेन स्वाधिकरणत्वनिवेशे व्यधिकर
णधर्मावच्छिन्नाभावस्य साध्यप्रतियोगितया तदसंग्रह इति साध्यतावच्छेदकसंबंधेन स्वप्रतियोगितावच्छेदकविशि
त्ता ष्टसाध्यवज्ञानं प्रति यत्संबंधावगाहियदभाववत्ताज्ञानं प्रतिबंधकं तेन संबंधेन तदभावाधिकरणत्वं विवक्षणीयं
व्यधिकरणधर्मावच्छिन्नाभाववत्ताबुद्धिरपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिप्रकारकबुद्धिं प्रतिबध्नातीति तादृशा
भावस्य लक्षणघटकतानिर्वाहः यदिवाभाववत्ताज्ञानं प्रति दैशिकविशेषणतासंसर्गकमपि तदभावाभावत्वाव
च्छिन्नप्रकारकं ज्ञानं प्रतिबंधकं अभावाभावस्यातिरिक्ततामते तादृशज्ञानप्रतिबंधकतायाः आवश्यकत्वात्

३४३ तस्यप्रतियोगित्वस्य प्रतामतेफलसाम्यानुरोधेनतदावश्यकत्वात् अभावस्यातिरिक्तत्वदशायांतत्प्रतिबंधकताया
दुरपह्नवत्वात् एवंचकालिकसंबंधावच्छिन्नप्रतियोगिताके घटत्वाभाववतीतित्वाभावादेरभावेसाध्येजात्या
त्वजातित्वादावव्याप्तिर्दुर्वारैव दैशिकविशेषणतासंबंधस्यापिनिरुक्तरूपाक्रांतत्वात् नन्वेवंतादृशसाध्यकत्वेपि
पक्षेतादृशसाध्याभावत्वावच्छिन्नप्रकारकप्रमारूपप्रतिबंधकत्वासंभवात् तद्विषयस्यहेत्वाभासतापत्तिरि
तिवाच्यं तत्रपक्षेसाध्यंनास्तीतिज्ञानस्यभ्रमत्वनिर्वाहादिति तदुपादानायतादृशसाध्येप्रतियोगिनस्तादृश प
साध्याभावत्वेनदैशिकविशेषणतयावृत्त्यनभ्युपगमादित्युच्यते तदानिरुक्तसंबंधेनसाध्याभावत्वावच्छिन्नाधि
करणताकूटमेवविवक्षणीयं हेतुमतितादृशाधिकरणताविरहान्नाव्याप्तिः परेतु घटत्वादेरपिदैशिकविशे
षणतास्वीकारआवश्यकः अन्यथाघटेनघटत्वाभाववदित्यादिनस्तुत्वेरव्यप्रतीतिव्यवहारयोरनुपपत्तिः कालेन १४१
द्रव्यत्वमित्यादिप्रयोगाभावेनदैशिकविशेषणतासंसर्गावगाहिबोधजनकत्वस्यैवतत्त्वपदेषुसन्नत्वात् नन्व

प

भावरूपप्रतियोगिवाचकपदसमभिव्याहृतनञादेशिकविशेषणेनाभावरूपप्र[illegible]वाचकपदसम
भिव्याहृतनञाचप्रतियोगिवृत्ताभावप्रतियोगितावच्छेदकसंबंधः प्रत्याय्य[illegible] इति व्युत्पत्तिरिति वाच्यं प्रति
योगितावच्छेदकसंबंधत्वेन संबंधताविरहाद्विशिष्यसमवायकालिकादिसंबंधभानस्यैवोपगंतव्यतयाप्र
तियोगिन्यभावे संबंधविशेषावच्छिन्नप्रतियोगित्वाबोधकादयमभावो नास्तीत्यादितः संबंधविशेषावच्छि
न्नाधेयतायाः प्रतीतौ नियामकाभावात् स[illegible]द्वारविशेषनिरपेक्षस्य तात्पर्यस्य नैयामकत्वे कालि
कादिसंबंधभानस्यैवोपगंतव्यतयाप्रतियोगिन्यभावे संबंधविशेषावच्छिन्नप्रतियोगित्वाबोधकादयमभा
वो नास्तीत्यादितः संबंधविशेषावच्छिन्नाधेयतायाः प्रतीतौ नियामकाभावात् समभिव्याहारविशेषनिरपेक्ष
स्य तात्पर्यस्य नियामकत्वे कालिकादिसंबंधावच्छिन्नप्रतियोगिताकात्यन्ताभावाभावस्य समवायादिसंसर्ग
तात्पर्येणात्मन्ययमभावो नास्तीतिप्रत्ययप्रसंगात् वास्तवतत्सं[illegible]ावच्छिन्नप्रतियोगिताकाभावरूपप्रतियोगि

१४२ वाचकपदसमभिव्याहारस्य तत्संबंधभाननियामकत्वे वस्तुतः कालिकसंबंधावच्छिन्नप्रतियोगिताकस्मिन्नभावेका
लिकसंबंधावच्छिन्नप्रतियोगिताकत्वसंशयदशायां अयमभावो नास्तीति वाक्यादधिकरणे एतदभावाभावप्रतीता
वप्यधिकरणे कालिकसंबंधेनैतदभावाभाववत्त्वादिसंशयस्य सर्वानुभवसिद्धस्योच्छेदापत्तेः अथैवं कालादा
वपि कालिकसंबंधावच्छि[illegible]घटत्वाभावो नास्तीति प्रतीत्यनुरोधेन घटत्वादेर्दैशिकविशेषणतास्वीकारावश्यकत
या तत्र समवायावच्छिन्नघटत्वाभावो नास्तीति व्यवहारापत्तिरिति चेन्न प्रतियोगिमति तदभाववत्त्वेन वृत्तेरनभ्युपग
मात् इत्थं च दैशिकविशेषणतासंबंधेन साध्याभाववत्त्वावच्छिन्नवत्त्वं लक्षणे निवेशनीयं कालिकसंबंधावच्छिन्नप्रति
योगिताकघटत्वाभावाभाववान् ज्ञात्मत्वादित्यादौ घटत्वाभावस्य तादृशसाध्याभाववत्त्वेनात्मन्यवृत्तेर्नाव्याप्तिः एते
न यादृशसाध्यकस्थले साध्याधिकरणे साध्याभावस्य तदधिकरणे च साध्यस्य न भ्रमः प्रसिद्धः तत्र प्रतिबध्यप्रति
बंधकभावकल्पनायामसंभवेन प्रतिबंधकताघटितलक्षणाव्याप्तिरिति निरस्तमिति वदंति तदुक्तयेति इत्यत्र १४२

थिवीत्वान्यतरत्वावच्छिन्नप्रतियोगिताया अपि तदुभयत्वसमनियततया तादृशाभाववतो गुणादेरेव निरुक्तसा
ध्याभावकूटाधिकरणत्वादिति भावः प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य साध्यतावच्छेदकविशेषणत्वमु
पगम्य तदुभयत्ववति प्रत्येकमुभयत्वाभाववत्त्वेन तस्य प्रतियोगिताव्यापकत्ववारणे तु तदुभयावच्छिन्नसाध्यकत्व [त्व]
ह्वेनाव्याप्तिर्द्रष्टव्या व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररूपेण साध्यतावच्छेदकमनीतो यो यो धर्मस्तदवच्छिन्न
त्वस्य प्रतियोगिताविशेषणत्वोपगमेनैतादृशातिव्याप्त्यवकाश इत्यतः स्थलांतरेऽतिव्याप्तिमाह अपिवेति द्रव्य
त्वत्वाद्यवच्छिन्नेति शुद्धद्रव्यत्वत्वावच्छिन्नेत्यर्थः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वादिति विशेषणावच्छिन्न
स्य शुद्धविशेष्यानतिरिक्तत्वादिति भावः तदवच्छिन्नाभाववतो गुणादेरेव यथोक्तसाध्याभावकूटाधिकरणत्वा
दिति भावः विशिष्टस्यातिरिक्तत्वेन साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वस्थले प्रतियोगित्वावच्छिन्नव्यापक[illegible]
[illegible]त्वनिवेशेन वा विशिष्टद्रव्यत्वादौ साध्यकस्थले शुद्धद्रव्यत्वाभावस्य वारणसंभवात् दूषणांतरमाह किंचेति

त्व

१४३ रूपाभावेति रूपत्वाद्यवच्छिन्नाभाववदित्यर्थः सहेतान्विति अव्याप्तिसूचनाय सकलरूपव्यधिकरणाप्रसिद्धेरि
ति तथा च तद्घटितसाध्याभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरिति भावः यावतामिति तथा च प्रकृते सकलरूपघ
टितसमुदायस्य न लक्षणघटकता सकलरूपाणामेकाधिकरण्यविरहात् किन्तु एकैकरूपव्यधिकरणधर्मावच्छि
न्नाभावघटितकूटानामेव प्रत्येकं तदधिकरणतान्वरूपवत्येव प्रसिद्धेति नाव्याप्त्यवकाश इति भावः इदमिति वा
योः पृथिवीवृत्तिद्वित्वसंयोगादिमत्वाद्वायुत्वादेरुक्तसाध्यव्यभिचारितागुणसामान्याभावस्य साध्यत्वे वायवीयस्य
पूर्णादिरहितसाध्याभावः तद्घटितनिरुक्ताभावकूटवद्वृत्तित्वाभावस्य यावदन्तर्गतस्य वायुत्वादावसत्वान्नातिव्या
प्तिप्रसंग इति पृथिवीवृत्तीति घटत्ववायुद्वित्वपटत्ववायुद्वित्वादिरूपपृथिवीवृत्तिगुणाभावाभावानां यावतामेका
धिकरण्यसंभवेन न तद्घटितकूटस्यापि लक्षणघटकतया तद्वति वायौ हेतोर्वृत्त्या नातिव्याप्तिसंभवः न च द्वित्वा १४२
दिरूपसाध्याभावस्य कालिकव्याप्यवृत्तितया व्याप्यवृत्तित्वविशेषणेन व्यावृत्तेः पार्थिवपरमाण्वेकत्वादिरेव ल।

क्षणघटक इत्यतिव्याप्तिर्दुर्वारैवेतिवाच्यं प्राचीनमते द्वित्वादिमति तत्प्रागभावादिकालावच्छेदेन तदत्यन्ताभा
वसत्त्वाद्द्वित्वादेरप्यव्याप्यवृत्तित्वादिति पृथिवीपदमेतत्पृथिवीपरं इदंपदपृथिवीपदयोः कर्मधारयो वा नाभिमतः
न्वस्वसमानाधिकरणाभावप्रतियोगित्वमनवच्छिन्नवृत्तिकत्वं वाव्याप्यवृत्तित्वं नतु स्वसमानाधिकरणात्यन्ताभावा
प्रतियोगित्वं तच्च न द्वित्वादिसाधारणमिति पृथिवीपदस्य पृथिवीसामान्यपरत्वेन क्षतिरितिवाच्यं एतदतिव्याप्ति
वारणानुरोधेनात्यन्ताभावघटितव्याप्यवृत्तित्वस्यैव निवेशयितुमुचितत्वात् एतद्रूपात्यन्ताभाववान् प्रमेयत्वादि
त्वादावेतद्रूपात्मकाभावस्य लक्षणघटकत्वेऽतिव्याप्त्यापत्त्या प्राचीनमते ऽत्यन्ताभावघटितव्याप्यवृत्तित्वनिवेशस्या
वश्यकत्वात् अत एव चाग्रे तन्तुरूपादिघटितत्वेनेत्यपि साधु संगच्छते पार्थिवरूपमात्रस्यैवाभिमततयात्यन्ताभावघ
टितव्याप्यवृत्तित्वानिवेशे तस्याव्याप्यवृत्तित्वाभावेन तदसंगत्यापत्तेः पृथिवीवृत्तीत्यत्र वृत्तिः समवायेन बोध्या तेन
स्पर्शादेः कालिकसंबंधेन पृथिवीवृत्तित्वेऽपि न क्षतिः पृथिवीसमवेतत्वाद्यवच्छिन्नत्वेनाभिमतायां प्रतियोगितायां केव

३४४ त्वसमवेतत्वस्यैवावच्छेदकत्वसंभवेन पृथिवीसमवेतत्वस्याभावप्रतियोगितानत्वाभावे गुरुधर्मस्य प्रतियोगितानवच्छे
दकत्वे प्रसिद्धेः पृथिवीसमवेतत्वाद्यवच्छि×वच्छेदकत्वात् न च पृथिवीसमवेतत्वावच्छिन्नायाः जलत्वादिव्याप्यत्वप्रतियोगितायाः
अतिप्रसक्तसमवेतत्वेनावच्छेदकत्वसंभव इति वाच्यं समवेतत्वावच्छिन्नप्रतियोगितातोऽतिरिक्तायाः जलत्वादिव्याप्यत्वप्रति
न योगितायाः एवासिद्धेः गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वे पृथिवीसमवेतत्वावच्छिन्नाभावसाध्यके नातिव्याप्तिसं
भवः तादृशाभावस्य समवेतत्वावच्छिन्नाभावसमनियततया तद्भिन्नत्वेन समवेमात्रस्यैव तदभावतया वायुत्वादेरपि
तथात्वात् न च पृथिवीसमवेतत्वविशिष्टाभाववति जलादौ समवेतत्वावच्छिन्नाभावविरहान्न तयोः समनैयत्यं एवं च गु
रुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमते पृथिवीसमवेतत्वस्य तादृशविशिष्टाभावप्रतियोगितावच्छेदकत्वमावश्य
कं समवेतत्वविशिष्टवति जलादौ तत्त्वेन तन्मात्रस्य तत्प्रतियोगितावच्छेदकत्वासंभवादिति वाच्यं विशिष्टाभावस्य
साध्यत्वे तस्य वायुसाधारणतया सद्धेतुत्वप्रसंगेन पृथिवीसमवेतत्वोपलक्षिताभावस्यैवात्र साध्यतयोपगंतव्यत्वादि १४४

ति गुणपदोपादानं पृथिवीसमवेतगुणत्वावच्छिन्नाभावो गुणादिसाधारणत्वान्न समवेतत्वावच्छिन्नाभावसमनियत
इति नोक्तदोषावसरः ध्वंसप्रागभावावच्छिन्ने सामान्याभावमुपगच्छतां वाय्वादेरप्युत्पत्तिकालावच्छेदेन पृथिवीवृत्तिगु
णसामान्याभाववत्त्वात् तत्साध्यको वायुत्वादिः सद्धेतुरेवेत्यतो नातिव्याप्तिसंभव इत्यतः साध्यांतरमाह सत्तान्येति स
त्तान्यत्वनिवेशनप्रयोजनं पूर्ववत् वायुत्वादेरपि सत्तान्यसमवेताभावाभाववत्त्वात् पृथिवीति अत्र पृथिवीपदं पृथिवी
सामान्यपरमेव घटवायुद्वित्वादेः स्वसमानाधिकरणात्यंताभावप्रतियोगित्वेन व्याप्यवृत्तित्वविशेषणव्यावृत्तत्वात्
त्र रूपादिघटितत्वेनेत्येतेन रूपपदोपादानं प्राचीनमताभिप्रायेण यन्यत्तं पूर्वं साध्यमभिप्रेत्य हेतौ साध्यसामानाधि
करण्यविशेषणेन वायुत्वेऽतिव्याप्तिरतो द्वितीयदले त्वनुसरणं ननु समनियताभावैक्यमते सत्तान्यपृथिवीसमवेतत्वाव
च्छिन्नाभावस्य सत्तान्यद्रव्यसमवेतत्वावच्छिन्नाभावाभिन्नतया विश्वसमवेतपृथिवीसमवेतत्वावच्छिन्नाभावस्य विश्व
समवेतस्पर्शवत्समवेतत्वावच्छिन्नाभावाभिन्नतया वायुत्वादिरपि तदभाववदिति न तादृशाभावसाध्यके तिव्याप्तिः संभ

द्धिकरण[illegible]भाव[illegible]मानाधिकरणसाध्याभा[illegible]त्व[illegible]कधेयत्वकत्वपर्यवसितं ।। आधेयव्यभिचारिमा

१४५ वत्तितीपूर्वोक्तायाह्रूपाभाववान्वायुत्वादित्यत्राव्याप्तेरेवोक्तविवक्षायांदुर्वारत्वामाह वस्तुतइति अत्रायमाशयः याव
तामेकाधिकरण्यंतावत्समुदायाधिकरणमित्यस्य यत्किंचिदधिकरणवृत्तिसकलसाध्याभावाधिकरणत्वंयत्किंचिद
त्व धिकरणवृत्तिसाध्याभावव्यापकाधेयताकत्वंपर्यवसितमर्थः साध्याभावाधिकरणाधिकरणकसकलसाध्याभावो
वत्वादितिसमुदायोपादायोपादानस्याकिंचित्करतया तद्विवक्षणासंभवः द्वितीयेचसाध्याभावसमानाधिकरण
साध्याभाववत्वमुक्तस्थलेनिखिलरूपाणामेवाक्षतमितितादृशसाध्याभावत्वव्यापिकानकेनाप्यधिकरणेननिरू
पिताधेयताऽतितादृशाधिकरणाप्रसिद्धिरत्वदवस्थैव ननुस्ववृत्तिसाध्याभावत्वव्यापकंयद्यदधिकरणवृत्तित्वंतत्तद
धिकरणवृत्तिसाध्याभावत्वव्यापकत्वंवृत्तिताकाधिकरणमेवाधिकरणंतार्थः धूमवान्वह्नेरित्यादौमहानसादि
कंनतथा अयोगोलकवृत्तितायास्तद्वृत्तिसाध्याभावत्वव्यापकत्वादयोगोलकवृत्तिसाध्याभावत्वस्यचसमानाधि
करणधर्मावच्छिन्नसाध्याभावसाधारणतयातद्वृत्तित्वाव्याप्यत्वादित्ययोगोलकाद्येवतादृशंस्वमितिनातिव्याप्तिः

[illegible]

तादृशायत्किंचिदधिकरणह्रदादिवृत्तित्वस्य वन्ह्यादौ सत्वेपि न क्षतिः तादृशं यद्यत्तत्वं वादन्यतमवृत्तित्वस्य सम
नियतत्वमिति योगिनाकाशाभावनिवेशात् अन्यतमत्वं च तत्तद्वृत्तिभिन्नत्वं न तु तत्तद्भिन्नान्यत्वं अतो न केवलान्व
यिसाध्यकेऽप्रसिद्धिः [illegible]त्वं यद्यत्तदधिकरणवृत्तित्वाभावकूटवत्त्वनिवेशेपि केवलान्वयिसाध्यके व्याप्तिर्दुलु
मतोपि तथात्वादिति तदुपेक्षितं रूपसामान्याभाववान् वायुत्वादित्यादौ च सकलरूपाणामेव तथात्वं स्ववृत्तितया
एव तत्तद्घटादिवृत्तिसाध्याभावत्वव्यापकत्वादतो नाव्याप्तिः अथवा स्व[illegible]वृत्तिसकलसाध्याभावसमानाधिकरण
साध्याभावत्वावच्छेदेन यदधिकरणवृत्तित्वं तादृशायत्किंचिदधिकरणवृत्तिसकलसाध्याभावत्वमेव यावतामित्या
देरर्थः धूमवान् वह्नेरित्यादौ च तादृशं यत्किंचिदधिकरणं न साध्यवत्तद्वृत्तिसकलसाध्याभावसमानाधिकरणस्य
साध्यतावच्छेदकावच्छिन्नसाध्याभावस्य तद्वृत्तित्वाभावात् किंतु अयोगोलकाद्येवेति न गतो न तथात्वात् नातिव्याप्तिः रू
पाभाववान् वायुत्वादित्यादौ च तादृशाधिकरणं तद्घटादिरेव व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव तद्वृत्तिसकल

साध्याभावसमानाधिकरणत्वात्तस्यावृत्तित्व[illegible]यमादिति नाव्याप्यवसरः शेषं पूर्ववत् अथवा सामान्यवृत्तिसा
ध्याभावसामान्यवृत्तिधर्मावच्छिन्नाधिकरणत्वमेव साध्याभावकूटाधिकरणत्वं जगत एव साध्याभावत्वावच्छिन्नाधिक
रणतयाऽनिर्वाह एवेति व्याप्तिवारणाय व्याप्यवृत्तित्वं धर्मविशेषणं तथा सत्यपि च जगत एव व्यधिकरणधर्माव
च्छिन्नसाध्याभावसामान्यवृत्तितथाविधधर्मावच्छिन्नाधिकरणत्वात् स एव दोष इति आधेयतावच्छेदकतादृशधर्मन्यू
नवृत्तित्वं तथ्यापि यद्यत्तदन्यत्वेन धर्मो विशेषणीयः न्यूनवृत्तित्वं च समानाधिकरणाभावप्रतियोगित्वमात्रं उक्तस्थले
तद्रूपव्यधिकरणधर्मावच्छिन्नसाध्याभावो न यत्वादिरेव तादृशो धर्मस्तस्य रूपान्तरसाधारणद्रव्यत्वादिन्यूनवृत्तित्वेऽपि
स्य तादृशत्रित्वाद्यवच्छिन्ने क्वचिदप्यवृत्तेः तस्याधेयतानवच्छेदकतया आधेयतावच्छेदकीभूततादृशधर्मन्यूनवृत्तिताविर
हात् न च सममनियताभावैकव्यधिकरणधर्मावच्छिन्नाभाववृत्तिधर्माप्रसिद्ध्या केवलान्वयिसाध्यकेऽव्याप्तिरिति वाच्यं
तथा सति सामान्यवृत्तित्वस्थले अव्याप्यवृत्त्यनेकवृत्तिधर्मभिन्नत्वस्यैव निवेशनीयत्वात् केवलान्वयिसाध्यके सा १४६

ध्याभावत्वस्यैव तथात्वादित्यतो दोषांतरदानाय वृत्तौ हेतुतावच्छेदकसंबंधं निवेशयति किंचेति धूमादावव्याप्ति
रिति वह्निमन्मात्रसमवेतघटादौ वर्त्तमानस्य निर्वह्निसमवेतत्वाभावस्य तत्रासत्त्वादिति भावः एतच्च यत्किंचित्सं
बंधावच्छिन्नतादृशवृत्तित्वत्वसमनियतप्रतियोगिताकाभावनिवेशाभिप्रायेण ९? अन्यथा निर्वह्निसंयुक्तत्वादिसाधा
रणतादृशवृत्तित्वत्वं प्रति तथाविधाभावप्रतियोगितायास्तत्काभावनिवेशा ? प्रायेण अन्यथा निर्वह्निसंयुक्तत्वादि
साधारणतादृशवृत्तित्वत्वं प्रति तथाविधाभावप्रतियोगिताया अव्यापकत्वात्तस्य लक्षणाघटकतया वृत्तिमन्मात्रा।
स्यैव साध्याभावाधिकरणकालादौ वृत्तेर्निर्वह्निवृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यै
त्या वद्वृत्तिमद्वृत्तित्वादेरसंगतेः अत एव संबंधमनिवेश्य तादृशाधिकरणावृत्तित्वसमनियतप्रतियोगिताकाभावनिवे च
शपक्षे दूषणांतरमाह साध्यतावच्छेदसंबंधेनेति एतच्च कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य साध्याभाव
स्य कालादावसत्त्वेपि तस्य यथाविवक्षितसाध्यभावसमुदायवत्त्वमक्षतमेवेति सूचनाय कालादिवृत्तित्वादिपदाद्विषयि।

३५७ तादिसंबंधिनईश्वरज्ञानादेः परिग्रहः अव्यभिचारिणीति यत्साध्यके वृत्तिमन्मात्राधिकरणस्य कालादेर्विवक्षितसाध्याभा
वकूटवत्त्वं तादृशाव्यभिचारित्वे तात्पर्यः द्रव्यत्वसाधनके द्रव्यत्ववत्पृथिवीत्वान्यतराभावगुणद्रव्यत्वाभावयोर्वायुत्वादिहेतुके
रूपाद्यात्मकसाध्याभावस्य सत्त्वादिसाध्यके संयोगेन समवायेन वा यत्र हेतुस्तत्र सत्तात्वावच्छिन्नाभावस्य च साधनवद्वृत्ति
त्वात् साधनसमानाधिकरणत्वेनाभावे विशेषितेन तादृशाभावानादायोक्तस्थलेऽव्याप्त्यतिव्याप्तिप्रसंजनसंभवस्त्वा
शंकते साधनेति सद्धेतावधिकरणधर्मावच्छिन्नाभावानामेव साधनसमानाधिकरणतया तादृशाभावकूटाधिकरणं
जगदेवाव्यभिचारित्वं साध्यतावच्छेदकावच्छिन्नसाध्याभावस्यापि तथा तादृशाभावकूटाधिकरणं नितिः साध्यमेव साधन त्वात्
ष्वि सामानाधिकरण्योपलक्षिताभावाधिकरणत्वमेव निवेश्यं न तु तद्विशिष्टाधिकरणत्वं तेन व्यतिरेकिणि हेतौ तद्विशिष्टा
धिकरणवृत्तित्वत्वावच्छिन्नाभावस्य वृत्तिमद्वृत्तित्वसंभवेपि नाव्याप्तिः साधनसमानाधिकरणत्वं साधनतावच्छेदकसंबं १५७
धेन साधनतावच्छेदकविशिष्टवद्वृत्तित्वं तेन द्रव्यत्वादेः कालिकसंबंधेनाधिकरणे स्पंदादौ सत्ताधिकरणे गुणादौ च द्रव्य

त्वपृथिवीत्वान्यतरत्वावच्छिन्नाभावस्य सत्त्वेऽपि द्रव्यत्वपृथिवीत्वोभयादिसाध्यके द्रव्यत्वद्रव्यवृत्तित्वविशिष्टसत्त्वादौ नाति
व्याप्तिः नच सत्तायां साध्याभावकूटवद्गुणादिवृत्तित्वसत्त्वात् विशिष्टसत्त्वे तदभावस्य दुर्लभतया नोपदर्शितसाध्यके
विशिष्टसत्त्वेऽतिव्याप्तिप्रसक्तिरिति वाच्यं साधनतावच्छेदकावच्छिन्नत्वानिवेशाद्द्रव्यत्वादिसाध्यकविशिष्टसत्त्वेऽव्याप्ति
वारणाय साधनतावच्छेदके साध्याभावकूटवद्वृत्तितावच्छेदकत्वाभावनिवेशस्यावश्यकतया उक्तस्थलेऽतिव्याप्तिप्रस
क्तेः संयोगेन घटादिहेतौ संयोगत्वावच्छिन्नसंयोगाभावस्य उत्पत्तिकालावच्छेदेन साधनवति वृत्तेर्व्याप्यवृत्तित्वविशि
ष्टस्याधिकरणे गुणादौ संयोगेन वृत्तेरप्रसिद्ध्या व्याप्तिः संयोगी सत्त्वादित्यादौ जगत एव संयोगाभाववत्त्वेनातिव्याप्तेर्वा
रणाय व्याप्यवृत्तित्वविशिष्टाभाववत्त्वानिवेशेन तस्यावश्यकत्वादित्यतोऽनवच्छिन्नेऽवृत्तिरत्र प्रवेश्या अथ साधनस
मानाधिकरणत्वेन साध्याभावे विशेषितेऽपि सत्तावान् ज्ञातेरित्यादावव्याप्तिवारणमशक्यमेव प्रत्येकं साधनसमाना
धिकरणाभ्यां द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावाभ्यां घटितभावसमुदायस्य सामान्याद्यादावेव सत्त्वात्तत्र

वा

३४८ वद्धेतुतावच्छेदकसंबंधेनवृत्तेरप्रसिद्धेः यत्तु द्रव्यत्वादिविशिष्टसत्ताभावप्रतियोगितावच्छेदककोटौ सत्तात्वंननिवेश्य
८३अ ते द्रव्यत्वादिवैशिष्ट्यमात्रस्यैवतत्प्रतियोगितावच्छेदकत्वसंभवात् इति द्रव्यत्वादिसाधारणद्रव्यत्वादिवैशिष्ट्यावच्छि\
न्नाभावप्रतियोगितायाः सत्तात्वसमनैयत्यविरहात् न तादृशाभावस्यलक्षणघटकतेतिसमाधानं तदतितुच्छं द्रव्यत्व
विशिष्टसत्तावान् जातेरित्यादावपीदृशयुक्त्या साध्यतावच्छेदकतादृशविशिष्टसत्तात्वस्याभावप्रतियोगितानवच्छेदक
त्वात् द्रव्यत्वादिवैशिष्ट्यावच्छिन्नाभावस्यसाध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावाद्यधिकरणधर्मावच्छिन्ना
भावमादायातिव्याप्तेर्दुर्वारतया एतल्लक्षणवादिना गुरुधर्मस्याभावप्रतियोगितावच्छेदक[illegible]मवलंबनीयत्वा स्या
त्वा न् द्रव्यत्वविशिष्टसत्तादेः प्रतियोगितानवच्छेदकत्वेपिसमवेतवान् जातेरित्यादौ समवायेन एतद्रूपान्यत्वविशिष्टाभा
वादीनां समवेतत्वसमनियतप्रतियोगिताकतया प्रत्येकंसाधनसमानाधिकरणतया च तद्घटितकत्वाधिकरणे सामा १४७
न्यादौ हेतुतावच्छेदकसंबंधेनवृत्तेरप्रसिद्ध्याव्याप्तिवारणासंभवात् एवं विशिष्टस्यातिरिक्ततामते ऽलंबनादर्शित
व

विशिष्टाभावं नांसाध्यतावच्छेदकसमनियतवृत्तियोगितोकत्वविरहोपपादनेन समाधानमपि देयं उक्तस्थलाए
वच्छेदकत्वतदन्यसमवेतोभय[redacted]त्वे गुणे तदन्यसमवेतोभयकर्मत्वतदन्यसमवेतोभयाभाववानांसाध्यतावच्छेदक
समवेतत्वसमनियतवृत्तियोगितोकानां प्रत्येकं साधनसमानाधिकरणानां समुदायवेति सामान्यादौ समवायेन वृ
त्तेरप्रसिद्ध्या व्याप्तेरलक्षणतापि वारणासंभवात् न च यादृशसाध्याभाववत्तोमाधिकरणं साधनाधिकरणं तादृशवृत्तो
माधिकरणवृत्तित्वाभावस्य विवक्षितत्वात् उक्ताभावसमुदायाधिकरणतायाः साधनेऽसंभवात् न तत्समुदाय
स्यलक्षणघटकतेति नाप्रसिद्धिरिति [redacted] वाच्यं एवं सत्यपि तादृशविशिष्टाभावाघटकतरघटितत्वाधिकरणाधर्मा
वच्छिन्नसाध्याभाववत्तोमस्यतादृशस्याधिकरणे केषांचिद्वृत्तिमतामवृत्तेः साधनस्यवृत्तेरप्रसिद्धत्वस्यात् ए
तादृशाविवक्षानुसरणेऽभूतत्वमूर्त्तत्वान्यतराभाववानस्पर्शवदन्यत्वादित्यत्राभूतत्वमूर्त्तत्वोभयघटितसाध्याभाव
कूटवत्तिद्वेतोरवृत्तित्वयावस्थामाणाति व्याप्तेरसंगतिप्रसंगात् साधनवत्तोनिम्नपूर्वस्य कस्यचिदपितादृशोभयघटि

तत्तोमाधिकरणत्वविरहेण तादृशास्तोमस्य लक्षणाघटकत्वात् प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणे वै
यर्थ्यापत्तेश्च पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलाद्यवृत्तित्वतेजोवृत्तित्वावच्छिन्नाभावघटितकूटस्वस्य
क्वचिदपि साधनवत्यसत्त्वेन तादृशकूटस्य लक्षणाघटकत्वात् यादृशकूटत्वं साधनवत्तन्मद्वृत्तित्वाभावस्य साधने
संभावितत्वात् इत्यतिव्याप्त्यनवकाशात् अत्राहुः साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्तिसमानाधिकरणधर्माव
च्छिन्नाभावभिन्नत्वेन साध्याभावविशेषणादुपदर्शितविशिष्टाभावनिरासः गुणकर्मान्यत्वविशिष्टसत्ताभावानुमा
नेरित्यादौ विशिष्टसत्तात्वावच्छिन्नसत्ताद्यभावस्य संग्रहाय यावच्छिन्नान्तं वृत्तिर्निरवच्छिन्ना ग्राह्या अन्यथा संयोगीस
त्वादित्यादौ संयोगत्वावच्छिन्नसंयोगाद्यभावस्य साध्यवद्वृत्तितया व्यधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटक
त्वेनातिव्याप्त्यापत्तेः सद्धेतौ साधनसमानाधिकरणस्य साध्यवद्वृत्त्यन्यस्याप्रसिद्धित् समानाधिकरणधर्मावच्छिन्नेति त
थाच व्यधिकरणधर्मावच्छिन्नसाध्याभाव एव विशिष्टभेदप्रसिद्धेः नन्वेवं साध्यतावच्छेदकव्यापकत्वं प्रतियोगितावि १५९

शेषणं अर्थे अभाववान् मेयत्वादित्यादौ घटत्वादिरूपाभावस्योक्तविशेषणेनैव [illegible]नादिति वाच्यं
प्रमेयसाध्यकस्थले घटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयसामान्याभावस्य गगनत्वाद्यवच्छिन्नगगनाद्यभा
ग्र वाभिन्नस्य संग्राह्यसाध्यतावच्छेदकव्यापकत्वेन समानाधिकरणधर्मस्यावश्यं निवेशनीयतया घटत्वा
दिरूपाभावप्रतियोगितावच्छेदकत्वं घटत्वाभावादेश्चाभावत्वाव्यापकत्वेन घटत्वादौ विशिष्टभेदस्याक्ष
तत्वादेतद्विशेषणेन तदव्याप्तेः न च वाच्यत्वादिसाध्यकस्थले घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावस्य सं
योगादिव्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावाभिन्नतया साध्यतावच्छेदकव्यापकसमानाधिक
रणधर्मावच्छिन्नप्रतियोगिताकत्वमक्षतमिति तत्संग्राह्यसमानाधिकरणसंबंधावच्छिन्नत्वस्य समा
नाधिकरणधर्मावच्छिन्नाभावप्रतियोगित्वविशेषणतयाऽवश्यकत्वात् प्रमेयसाध्यस्थलीयोक्ता
भावस्य व्यधिकरणसंबंधावच्छिन्नगगनाद्यभावाभिन्नत्वेऽपि प्रतियोगितावच्छेदकधर्मे साध्यतावच्छेदक

व्यापकत्वविशेषणमंतरेणैव विशिष्टभिन्नत्वमस्याद्रुतमेवेति वाच्यं एवमपि गगनत्वादिना प्रमेयसामा
न्याभावस्य समानाधिकरणधर्मतादृशसंबंधावच्छिन्नप्रतियोगिताकतयाउक्ताभावस्य तद्भिन्नत्वेन तत्र
विशिष्टभेदनिर्वाहाय तादृशविशेषणस्यावश्यकत्वात् समानाधिकरणसंबंधावच्छिन्नत्वविशेषणं परि
त्यज्य साध्यतावच्छेदकसंबंधावच्छिन्नत्वं प्रतियोगितायां निवेश्य तत्कार्यस्य साध्यतावच्छेदकव्यापकत्वस्यप्र
तियोगितावच्छेदकविशेषणस्यार्थकत्वस्यचोपपादनसंभवात् साध्य[illegible]तादृशाभावस्योभयत्वादिना सा
ध्याभावत्वएव प्रसिद्ध इति न काचिदनुपपत्तिः एतेन नीलरूपघटत्वोभयाभाववान् नीलघटान्यत्वादित्यादौ
साधनसमानाधिकरणपदीयनीलरूपघटत्वात्मकसाध्याभावघटितकूटाधिकरणाप्रसिद्ध्या व्याप्तिरि
त्यपि निरस्तं तादृशाभावे उक्तभेदासत्वेन समधिकरणधर्मावच्छिन्नाभावस्यैव लक्षणघटकत्वात् एवंघ १५०
टवृत्तित्वविशिष्टाकाशाभावादेरभावे साध्ये मेयत्वादि हेतौ साध्याभावस्य विशिष्टाकाशाभावादिराकाशाभा

वानतिरिक्ततयाऽनुगत एव साध्याभाववत्कूटाधिकरणेनापत्यातिव्याप्तिरिति साध्याभाववत्त्वविशिष्टाधिक
रणत्वमेव विवक्षणीयं तथा च पटे घटवृत्तित्वविशिष्टाकाशाभाववत्त्वाभावेनाकाशादिप्रत्ययाभावात् परा
देर्न ताद्दृशविशिष्टाभावाधिकरणत्वमिति न दोषः एवं च साधनसमानाधिकरणेपि साध्याभाववत्त्वेन वृ
त्तिर्विवक्षणीया अन्यथा ज्ञातिमदन्यत्वविशिष्टकाशाभावस्याभावे साध्ये समवायेन वृत्तौ साधनसमाना
धिकरणकाशाभावस्य साध्याभाववत्त्वविशिष्टस्याधिकर ॥ सामान्यादौ समवायेन वृत्तेरप्रसिद्धत्वादव्या
प्त्यापत्तेस्तादृशाविवक्षयातु केऽभयाभावसाध्यकस्थलेऽव्याप्तिवारणं संभवति प्रत्येकाधिकरणेऽभया
भाववत्त्वेनावृत्तिः वस्तुतो घटवृत्तित्वविशिष्टाकाशाभावाद्यभावो घटत्वाद्यभावसमनियततया तद्भि
न्न इति घटत्वादिरपि तदभावकः इत्थं च तत्तद्व्यक्तितत्कूटाधिकरणेनाननुगत इति दर्शितातिव्याप्त्यनवका
शात् साध्याभाववत्त्वविशिष्टाधिकरणत्वविवक्षणमफलं साध्याभाववत्त्वेन साधनवद्वृत्तित्वं तु साध्याभा

१५१ त्वविशिष्टाधिकरणत्वाविवक्षणेपि घटान्यत्वविशिष्टद्रव्यत्वाभाववान् घटत्वादित्यत्र साध्याभावस्य द्रव्यत्वस्य
द्रव्यत्वत्वादिना साधनसमानाधिकरणतया द्रव्यस्यैव तद्घटितकूटाधिकरणत्वेनाप्रसिद्धिवारणाय निवेश्यमेव
नन्वेवमपि पृथिवीमन्यद्रव्यत्ववद्रव्यत्वादित्यादौ साध्यतावच्छेदकविशिष्टवद्वृत्त्योः प्रत्येकं साधनसमानाधिकर
णयोर्घटान्यत्वविशिष्टद्रव्यत्वाभावघटेतरपृथिवीमन्यत्वविशिष्टद्रव्यत्वाभावयोरधिकरणं गुणादावेवेत्यतिव्या
प्तिर्दुर्वारैवेति वाच्यं विशिष्टस्यातिरिक्ततापक्षमवलंब्यैव तादृशातिप्रसंगस्य समाधातुं शक्यत्वादिति भूत
त्वमूर्त्तत्वाद्याविति उभयत्वावच्छिन्नाभावस्य साध्यत्वे हेतुर्व्यभिचारित्वाभावादन्यतरत्वावच्छिन्नाभावस्य सा
ध्यत्वानुसरणं पृथिव्यादाविति आकाशे भूतत्वस्य मनसि मूर्त्तत्वस्य साधनसमानाधिकरणतया आकाशस्य
मनसः प्रत्येकं उभयानधिकरणत्वेन साध्याभावसमुदायानधिकरणत्वादिति भावः आदिपदाद्भूतभेदमू १५१
र्त्तभेदान्यतराभाववान् भूतमूर्त्तान्यतरत्वादित्यादौ भूतभेदमूर्त्तभेदात्मकसाध्याभावघटितसमुदायवतिका

जद्दिगादौ हेतो रवृत्त्यातिव्याप्तेः परिग्रहः ननु साधनाधिकरणे येषां परस्परमेकाधिकरण्यं तत्समुदायस्य विवक्षितत्वान्नायं दोषः मूर्तत्वमूर्तत्वाद्योः प्रत्येकं साधनसमानाधिकरणत्वेपि साधनवति परस्परमेकाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात् तदेकतरघटितकूटस्यैव तथात्वात् तद्वति च हेतौ वृत्तेः प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं साफल्यमेव एवं च विशिष्टस्यानतिरिक्तत्वेपिष्टाधिमन्द्रव्यत्ववद्रव्यत्वादित्यादौ नोक्तरीत्यातिव्याप्तिसंभवः उक्तविशिष्टाभावानां साधनवति द्रव्यादौ वैकाधिकरण्याभावात् एवं तादृशकूटाधिकरणे पृथिव्यादिवृत्तित्वस्य द्रव्यवृत्तित्वादिना येन भावस्तस्यापि तादृशवृत्तित्वत्वस्याव्यापकप्रतियोगितो आकाशादिवृत्तित्वसाधारणतया तादृशवृत्तित्वत्वाव्याप्यत्वान्न तादृशाभावो लक्षणघटक इति वाच्यं साधनसमानाधिकरण्यत्वस्य साध्याभावविशेषणतापक्षे प्रतियोगितायां तादृशवृत्तित्वत्वव्याप्यत्वविशेषणव्यावृत्त्यभावेन तादृशविशेषणस्य परिसाफल्यत्वात् वह्निमान् धूमादि

१ यावदभावान्तर्गततया तद्वत्त्वविरहः युक्तहेतौ नातिव्याप्तिसंभवः न च द्रव्यवृत्तित्वत्वावच्छिन्नाभावप्रतियोगितायाः

१५२ त्वञ्चालोकाद्यैर्वृत्तित्वरूपेणनिर्वह्निवृत्तित्वाभावस्यप्रतियोगितायाआलोकादिनिष्ठपर्वतादिवृत्तित्वसाधारण्या
साधनसमानाधिकरणसाध्याभावकूटाधिकरणवृत्तित्वत्वंप्रत्यव्यापकतयैवतादृशाभावव्यावर्त्तनात् व्यापृत्य
वृत्तिधर्मानवच्छिन्नत्वेनप्रतियोगिताविशेषणेनपर्वतसंयुक्तपर्वतान्यसंयुक्तत्वोभयत्वाद्यवच्छिन्नाभावस्यपर्वता त्व
संयुक्तघटादौवर्त्तमानस्यधूमादावसत्त्वेपिनक्षतिः प्रतियोगितायांतादृशवृत्तित्वत्वव्याप्यत्वविशेषणेपितादृशा
भावमादायाव्याप्तेरावश्यकतयाएतद्विशेषणस्यतद्विशेषणेसत्त्वेप्यनावश्यकत्वात् चरमाभावप्रतियोगि[illegible]
त्व तायांतादृशवृत्तित्वत्वव्याप्यत्वविशेषणत्यागेसाधनाधिकरणवृत्तिसाध्याभावस्यसमुदायाविवक्षणेपिप्रथमा
भावप्रतियोगितायांसाध्यतावच्छेदकव्याप्यत्वविशेषणंपरित्यज्यमेवपृथिवीत्वत्वप्रका कत्वमाविषय
त्वादित्यादौजलाद्यसमवेतत्वावच्छिन्नाभावकूटवत्त्वस्यसाधनेऽसत्त्वेपितादृशाभावकूटवत्सामान्यादिवृत्तित्व
त्वव्यापकप्रतियोगिताकयावदभावान्तर्गतानांपृथिव्याम[illegible]वृत्तित्वावच्छिन्नाभावानामेववृत्तिमद्वृत्तीनांदेतावस १५२

त्वेनातिव्याप्त्यनवकाशात् एवं सत्तावान् न जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावघटितकूटाधिकरणसम
वेतत्वाप्रसिद्धिनिबंधनाव्याप्तिवारणायोपात्तसाध्यवद्वृत्तिसाध्यतावच्छेदकव्यापकसमानाधिकरणधर्मावच्छि
न्नाभाववद्भिन्नत्वस्वरूपसाध्याभाववद्विशेषणस्य स्थले साध्याभावप्रतियोगितायां साध्यवद्वृत्त्यभावीयसामानाधिकर १६
णधर्मावच्छिन्नप्रतियोगिताभिन्नत्वं निवेशीं व्यधिकरणधर्मावच्छिन्नाभावीयगगनाना-किंचिद्विशिष्टतदभाववनि
ष्ठप्रतियोगिताभिन्नव्यधिकरणधर्मावच्छिन्नप्रतियोगितामादायैव व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्सं
यद्देसमानाधिकरणधर्मे साध्यतावच्छेदकव्यापकत्वस्यानिवेशनीयतयाऽभावसाध्यकस्थले साध्यतावा
च्छेदकन्यूनवृत्तिघटत्वाभाववत्त्वाद्यवच्छिं[illegible]प्रतियोगितास्तु साध्यवद्वृत्त्यभावीयसमानाधिकरणधर्मावच्छि[illegible]
न्नप्रतियोगिताभिन्नत्वाभावेन घटत्वाद्यात्मकाभावव्यावर्त्तनात् साध्याभावप्रतियोगितायां साध्यतावच्छेदक
व्यापकत्वविशेषणमपि परित्यजनीयं उक्तरीत्यापि पृथिव्यन्यद्रव्यत्ववद् द्रव्यत्वादित्यादौ घटाद्यन्यत्ववि

१९३ शिष्टद्रव्यत्वाद्यभावकूटस्य हेतुमत्यसत्वेपि घटान्यवृत्तित्वत्वादिनागुणादिवृत्तित्वाद्यभावमादायातिव्याप्तिर्वा
रणीयेत्यतो दोषांतरमाह किंचेति केचित्तु साधनसमानाधिकरणसाध्याभावसमुदायाधिकरणं यद्यत्सा
धनाधिकरणं तद्वृत्तिसाध्याभावसमुदायाधिकरणं यद्यत्तत्तद्वृत्तिसाध्याभावसमुदायाधिकरणत्वमनेन विवक्षि
तं संकेतौ तादृशत्वं न गदे वह्न्यधिकरणमहानसादिनिष्ठानां च धूमादिसामानाधिकरणसाध्याभावानां व्य
धिकरणधर्मावच्छिन्नप्रतियोगिताकानां समुदायो वद्यद्यत्साधनाधिकरणं तद्वृत्तितादृशसमुदायवत्त्वस्य म
हानसादौ साध्यवति साध्यशून्ये च क्रोडे दौ सत्त्वादतो लक्षणसमन्वयः मूर्तत्वमूर्तत्वान्यतराभाववान्स्पर्श
वदन्यत्वादित्यादौ तादृशत्वं गगनं मनश्च गगनवृत्तिमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य गगन॥
रूपसाधनाधिकरणे एवं मनोवृत्तिमूर्तत्वघटितसाध्याभावसमुदायाधिकरणत्वस्य मनसि एवं सत्वेन निरुक्त १९३
साधनाधिकरणवृत्तिसाध्याभावसमुदायाधिकरणत्वस्य तत्र तत्र सत्त्वात् स्ववृत्तिसाध्याभावे साधनाधिक

रणत्वविशेषणानुपादानेवन्ह्यादिशून्यह्रदादिनिष्ठसमानाधिकरणधर्मावच्छिन्नसाध्याभावसमुदायाधि
करणत्वस्यसाधनाधिकरणेसत्वात्साध्यवद्वृत्तितादृशंस्वंहेतित्वाभावस्यवृत्तिमद्धेतेर्दैतावसत्वात्अमानिरत
स्तत्रतद्विशेषणप्रवेशःप्रथमसमुदायपदादानेन्भूतत्वमूर्तत्वान्यतराभाववान्स्पर्शवदन्यत्वादित्यादौग
गनंमनश्चनतादृशंस्वंतद्वृत्तित्वाधिकरणधर्मावच्छिन्नाभावाधिकरणमनोगगननिष्ठभूतत्वमूर्तत्वघटित
साध्याभावसमुदायाधिकरणत्वस्यगगनमनसोःप्रत्येकंसत्वात्किन्तुपृथिव्या। [illegible]चत्तुएकमेवतथाविधंस्वंतद्
वृत्तित्वाभावस्यहेतौसत्वादित्याशिरतस्तदुपादानंधूमवान्वन्हेरित्यादावपिपर्वतादेःस्ववृत्तिसाध्याभा
वकूटाधिकरणमहानसादिरूपसमघानाधिकरणवृत्तिसाध्याभावकूटाधिकरणतयाजगदेवतादृशंस्वं
स्यादतोयद्यदिति तथाचपर्वतादिवृत्तिसाध्याभावाधिकरणंयद्यत्साधनवदयोगोलकादेरपितदन्तर्गता।
तयातद्वृत्तिसमानाधिकरणधर्मावच्छिन्नाभावघटितसाध्याभावकूटस्यपर्वतादावसत्वात्तादृशंस्वंधूमादि

गदा.　　　　　　　　　धि

१५४ मूर्त्तमेवेति नातिव्याप्तिः यद्यत्साधनाधिकरणमित्यनुक्त्वा यदधिकरणमित्येतावदुक्तौ भूतत्वमूर्त्तत्वान्यत
राभाववान् स्पर्शवदन्यत्वादित्यादौ गगनादिवृत्तिसाध्याभावकूटाधिकरणं यत् पृथिव्यादेरपि तदन्तर्गततत
या तद्वृत्तिमूर्त्तत्वादिघटितकूटस्य च गगनाद्यवृत्तित्वात् तादृशं त्वं न गगनादिकं भवेदपि तु पृथिव्यादिकमेवेत्यति
व्याप्तिरतः साधनाधिकरणनिवेशः पृथिव्यादेस्तत्र साधनेनाधिकरणत्वान्न दोषः धूमवान् वह्नेरित्यादौ च यो
गोलकादिनिष्ठत्यधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणत्वस्य पर्वतादेः सत्त्वाज्जगद्वृत्ताहशांस्त्वस्मादि
तिचरमसमुदायोपादानं पूर्ववत् ता शं यद्यत्त्वं तावदन्यतमवृत्तित्वत्वव्यापकप्रतियोगिताकाभावो विव
क्षणीयः अतो नातिव्याप्तिरसंभवो वा इत्यतो दोषान्तरमाह किं चेति सार्द्धः महाकालेति कालान्यत्वसा
ध्यके कालिकविशेषणताविशेषेण हेतौ साध्यसामानाधिकरण्यविशेषेणातिव्याप्तिवारणसंभवात् १५४
महाकालेनेदसाध्यकानुसरणं यद्यपि महाकालत्वसाध्यकेति व्याप्तिः संभवति वृत्तिमन्मात्र एव महाकाला

तिरिक्तकालवृत्तित्वस्याप्यपिसत्त्वात् तथापि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नाभावघ
टितवक्ष्यमाणलक्षणे तत्तत्कालमात्रवृत्तितत्तत्कालावृत्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्यानातिव्या
प्तिः साधनाधिकरणे संभवदेकाधिकरणैकसाध्यताकसमुदायाधिकरणप्रयोजनं नान्तरानुरोधेन निवेशो त्वस्य
तादृशाप्रसिद्धिविरहेऽपि साधनाधिकरणीभूतखण्डकालव्यक्तिविशेषवृत्तित्वावच्छिन्नाभावघटिततादृशकू
टाधिकरणे तत्कालवृत्तित्वाभावस्य तत्तत्कालवृत्तौ वृत्तिमति वर्तमानस्य साधनेऽभावान्नातिव्याप्तिरित्य
ग्रिमस्यैतेनैतस्यादेरसंगतिरिति एकमात्रविपक्षैकानुसरणे आदिपदान्महाकालत्वाभावादिपरिग्रहः
अवृत्तिहेतौ साध्यसामानाधिकरण्यविशेषणे नातिव्याप्तिवारणसंभवात् व्यभिचारिणीति वृत्तिमत्त्वमा
त्रमत्र विवक्षितं तन्मात्रस्यैव व्यावर्तकत्वात् समवायादिनाऽसत्त्वादिहेतुके तादृशसंबन्धेन महाकालवृ
त्तित्वावच्छिन्नाभावस्य वृत्तिमति घटत्वादौ वृत्ते[illegible]ता वृत्तेर्नातिव्याप्तिसंभवइति कालिकसंबन्धावच्छिन्न

३ यस्य निवे· महाकाल ··· मानाधिकरणधर्मावछिन्नाभावः ३ ··· इतिमहत्ति ८ ··· त्तिम· वति···

न

हेत्वननुसरणं इदमुपलक्षणं ईश्वरज्ञाना न्यत्वादिसाध्यके विषयितासंबंधे हेतुमात्रे साध्याभावसमुदा
य वतीश्वरज्ञानादौ तेन संबंधेन वृत्तुमात्रस्यैव हेतोरतिव्याप्तिरिष्टम् एतेनै त्वविशेषणस्य लैहेत्वित्व
प्रतियोगिताकत्वोभयानैरस्तु दत्ताभावे ··· मत्वेपि निनिस्तारः एवं यथाश्रुते घटादिसा
ध्यके व्यभिचारिणि संयोगेन हेतौ साध्याभाववति संयुक्तमात्रस्यैव संयुक्तत्वात् एतद्रूपत्वादिसाध्यके व्य
भिचारिणि समवायेन हेतौ समवेतमात्रस्यैव एतद्रूपाद्यतिरिक्तसमवेतत्वादतिव्याप्तिरिसपिद्रष्ट
व्यं इति कूटितलक्षणं समाप्तिमगात् साध्यतावछेदकावछिन्नव्यापकतावछेदकरूपावछिन्नाभाव
कूटाधिकरणत्वस्य नानाविपक्षकस्थलेप्रसिद्धावपि साधनसमानाधिकरणतादृशाभावकूटाधिकरण
स्य नाप्रसिद्धिरिति ··· मानाधिकरणत्वविशेषणत्वविशेषणप्रक्षेपेनादृशाभावकूटाधिकरणसमा १५५
नाधिकरणतादृशाभावकूटाधिकरणस्य ··· साधनसमानाधिकरणत्वविशेषणप्रक्षेपेतादृ

शाभावकूटाधिकरणतागर्भमेव लक्षणं सम्यक् साध्यतावच्छेदकव्यापकतापेक्षया साध्यतावच्छेदकावच्छिन्न
व्यापकतावच्छेदकत्वस्य गुरुत्वेपि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितलक्षणे सत्ताभावानुमाने
रित्यादौ विशिष्टसत्ताभावादिवारकोक्तविशेषणनिवेशे महागौरवात् विशिष्टस्यानतिरिक्तत्वेपि पृथिवीत्ववत् न्यत्ववि[illegible]ष्टद्रव्य
द्रव्यत्वादित्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभावादेरपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छि
न्नप्रतियोगिताकत्वोक्तदिशातिव्याप्तिवारणाय तादृशाभावघटितलक्षणेपि साधनवतिसंभवादेकाधि
करणकतादृशाभावसमुदायस्यावश्यं विवक्षणीयतया पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ समवा
यसंबन्धावच्छिन्नजलादिसमवेतत्वावच्छिन्नाभावघटितकूटाधिकरणत्वस्य सामान्यादौ सत्त्वेप्यतिव्याप्तेरन
वकाशात् प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणेनोपादेयं यद्यपि साधनवतिसंभवादेकाधि-
क करणैककूटनिवेशे द्रव्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावघटितकूटस्य सत्ताभावानुमानेत्यादौ

१५६ नलक्षणघटकत्वाप्रसक्तिस्तथापि साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावनिवेशे तादृशाभावैकरतव्यधि
करणधर्मावच्छिन्नाभावघटितकूटस्य तथात्वाद्व्याप्तिरिति तदुपेक्षितीरीत्या सार्वजनीनलक्षणपरिष्कारमपि
हेतुतावच्छेदकसंबंधेन वृत्तिमत्समुदायाधिकरणमहाकालादिमात्रविपक्षकव्यभिचारिण्यतिव्याप्त्यापत्त्यानि
राकुरुते एतेनेति प्रतियोगितायामवच्छिन्नत्वविशेषणव्यावृत्तिरभाववान्मेयत्वादित्यत्र वह्निमान्धू
मादित्यत्रापि बोध्य यादृशसाध्याभावकूटाधिकरणं साधनवत्तार्णतार्णदहनोभयाभावादिघटित
कूटस्यापि तथाविधकूटतया तथाविधोभयाभावादिमद्वृत्तिपदार्थे वर्त्तमानस्य तादृशकूटाधिकरणवृत्ति
त्वाभावस्य हेतावसत्त्वात् तत्रत्रसाध्यतावच्छेदकसंबंधावच्छिन्नत्वेनापि प्रतियोगिताविशेषणीया अन्य
था वह्निमान्पर्वतवन्ह्यवयवसंयोगादित्यत्र संयोगसंबंधावच्छिन्नवन्ह्यभावसमवायसंबंधावच्छिन्नवन्ह्यभा १५६
वयोः कूटस्य साधनाधिकरणे सामानाधिकरण्याभावेन तदुभयघटितकूटस्य लक्षणाघटकत्वात् अतिव्या

विरहेपिवह्निमान्धूमादित्यादौसाध्यतावच्छेदकसंबंधातिरिक्तसंबंधावच्छिन्नाभावकूटस्यतु उक्तक्रमेण
लक्षणघटकतया तद्वतिवह्न्यवयवाद्यतिरिक्तेहेतोर्वृत्तेरसंभवापत्तेः व्यापकतापिसाध्यतावच्छेदकसंबं
धेन अन्यथा समवायेन वह्निसंयोगेसाध्येसंयोगेनसाध्यव्यापकस्य वह्नेःसमवायसंबंधावच्छिन्नाभावघटि
तकूटाधिकरणवह्न्यवयवातिरिक्तवृत्तेर्मध्ये तावद्व्याप्यापत्तेः इत्थं च संयोगेनसाध्यतायांतेनसंबंधेव्यापक न
तासिद्धेः व्यापकताघटकाभावप्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतया व्याप्यवृत्तिपदंसार्थक
मितिकेचित् वस्तुतस्तु येनसंबंधेनव्यापकता तेनैवाभावो ग्राह्यः साध्यतावच्छेदकसंबंधस्य विशिष्य निवे
शेऽवच्छिन्नवृत्तिकान्यत्वरूपव्याप्यवृत्तित्वनिवेशे संयोगेन धूमादिसाध्यकेतत्संबंधावच्छिन्नधूमत्वाद्य
वच्छिन्नाभावस्य धूमवत्यवच्छिन्नवृत्तिकतया अधिकरणधर्मावच्छिन्नाभावमात्रस्य व्याप्यवृत्तित्वेनाति
व्याप्त्यापत्त्या अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वस्यैव निवेशनीयतया एवमित्यादिपंक्त्यसंगतेर्वक्ष्यमाण

प्य

अन्योन्याभावघटितव्यापकतानिवेशाच्च व्याप्यवृत्तिपदसार्थक्यं संयोगाभावसाध्यकस्थले संयोगघटि
तकूटाधिकरणतायाः द्रव्यमात्रे सत्वात् तद्वृत्तिहेतावव्याप्तिवारणरूपं तत्पदप्रयोजनमाह केवलान्वयिन
इति एतेन तन्मतेऽधिकेन द्रव्यवृत्तेः सद्धेतुत्वमक्षतमिति सूचितं गुणवान् द्रव्यत्वादित्यादौ गुणादावनवच्छिन्न
वृत्तिकगुणाद्यभाववतिनित्यद्रव्यातिरिक्ते हेतोर्वृत्त्याव्याप्तिवारणरूपमनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्व
विशिष्टाभाववन्निरूपिताधिकरणतानिवेशेन फलमाह एवमिति साध्याभाववृत्तिकालावच्छेदेन द्रव्यवृ
त्तित्वकथनं द्रव्यत्वेन तद्वृत्तिताभावे सत्वेनाव्याप्तिप्रसंग इति सूचनाय वृत्तिरित्यत्र द्रव्यत्वाधिकरणेपीत्य यप्य
नुषज्यते इति व्याख्यानमसत् अनवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वनिवेशने संयोगी घटादित्यत्राकरी
त्याव्याप्तेर्वारणाय साधनवति व्याप्यवृत्तित्वस्यावश्यं निवेशनीयतया तत एवाव्याप्त्यप्रसक्तेः साधनवतिव्या १५७
प्यवृत्तित्वपर्यन्तनिवेशनप्रयोजनपरतया एतत्संक्षिप्तव्याख्यापि न साधीयसी व्याप्यवृत्तित्वविशिष्टाधिकरण

त्वाप्रवेशि संयोगीसत्वादित्यत्र गुणादौ व्याप्यवृत्तेः संयोगाभावस्यैव द्रव्यत्वाद्यभावस्यापि लक्षणघटकतया
नगतः साध्याभावकूटानधिकरणतयातिव्याप्त्यनवकाशोपि धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकसंबंधो
गसंबंधावच्छिन्नप्रतियोगिताकाव्यापकतावच्छेदकावच्छिन्नाभावकूटाधिकरणताया विश्वस्मिन्नसत्वादिति द
व्याप्तेर्दुर्वारतया तत्प्रवेशनस्यावश्यकतया तावतापि उक्ताव्याप्तिवारणसंभवात् तस्माद्व्याप्यवृत्तित्वमवच्छिन्न
वृत्तिकान्यत्वमत्राभिमतं अतोपि साध्यतावच्छेदकव्या[illegible] ,प्रतियोगिताकाभावोपेक्षा तन्निवेशो साध्यताव
च्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वस्यैव निवेशनीयं संयोगेन साध्यतायामव्याप्तिवारिणि त्वधिकरणधर्मा तया
वच्छिन्नप्रतियोगिताकस्यैव संयोगेन द्रव्यत्वाभावस्यावच्छिन्नवृत्तिकान्यतयातिव्याप्तेः एतन्मते योगोल्कभे
दाभावमादायैवातिव्याप्तेर्वारणं बोध्यं तन्निवेशनस्यैव दैशिककालिकाव्याप्यवृत्तिसाध्यकेदेनस्थलद्वये
व्यावृत्तिरभिहितेति सारं स्वसमानाधिकरणत्वनिवेशनप्रयोजनमाह उक्तरूपेति साध्यतावच्छेदकसंब

१५८ च्छिन्नव्यापकतावच्छेदकरूपेत्यर्थः अप्रसिद्ध्यादिति सत्तावान्जातेरित्यादौ सत्तावच्छिन्नाभावकूटाधिक
रणेहेतुतावच्छेदकसंबंधेनवृत्त्यप्रसिद्धिसंपादकाः रूपाभावादिसाध्यकेरूपाद्यात्मकाभावकूटाधिक
रणाप्रसिद्धिसंपादकाः रूपाभावादिसाध्यकेरूपाद्यात्मकाभावकूटाधिकरणाप्रसिद्धिसंपादकाःसंभवदे
काधिकरण्यापन्नसाध्याभावस्यासामानाधिकरण्यविवक्षणेसत्ताभ्यपृथिवीसमवेतशून्यंवायुत्वादित्यादेरेत्वा
दिपदग्राह्यायाजातिव्याप्तेःसंपादकाबोध्यः पूर्वोक्तरीत्येति समुदायाधिकरणवृत्तित्वंहेतुतावच्छेदक
संबंधेनतदभावस्याहवृत्तित्वव्यापकप्रतियोगिताकःहेतुतावच्छेदकसंबंधेनवृत्तिमत्वंलक्षणघटक
बोध्यमित्यर्थःअपास्तमिति नचसार्वत्रौममतेसामानाधिकरण्यस्याव्याप्यवृत्तितयासाध्याभावकूटवत्सद्वा
काव्यवृत्तित्वस्यसमानाधिकरणधर्मावच्छिन्नाभावोपिसामानाधिकरण्यानिरूपकखंडकालाद्यवच्छेदेन १५८
घटादिरूपवृत्तिमतिवर्त्ततएवेतिमहाकालान्यत्वसाध्यकेनातिव्याप्तिसंभवइतिवाच्यं तथासतिवन्ह्यादाव

पिस्वावयवाद्यवच्छेदेननिर्धूमसंयुक्तत्वाद्यभावसत्वेन धूमवान्वह्नेरित्यादावतिव्याप्तेरुक्तरूपस्थलेतिव्याप्तिवा
रणस्यसुदूरपराहतत्वात् यत्तु हेतुतावच्छेदकसंबंधेनहेत्वधिकरणसामान्यावच्छेदेनतद्वत्वस्यविवक्षि
तत्वात्नातिव्याप्तिर्व्यभिचारनिरूपकाधिकरणावच्छेदेनहेतौतद्वत्वविरहादिति तन्न एवंसतिस्वावयवाव
च्छेदेनघटादिवृत्तेःसमानाधिकरणधर्मावच्छिन्नजगत्संयुक्तत्वाद्यभावस्यपर्वताद्यवच्छेदेनधूमादावसत्वा
दसंभवापत्तेः वृत्तिमद्वृत्तिपदेनहेतुतावच्छेदकसंबंधेनयस्ययदधिकरणंतदवच्छेदेनतद्वृत्तित्वविवक्षाया
मपिव्याप्यवृत्तेरवच्छेदकानभ्युपगमेव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यासाध्याभावकूटाधिकर
णवृत्तित्वाभावस्याधिकरणानवच्छिन्नतयासंभवस्यदुर्वारत्वात् यदिचवृत्तिमत्वानवच्छिन्नवृत्तेर्यो यावंतः
स्वाद्यवृत्त्यभावकूटाधिकरणवृत्तित्वाभावाअनवच्छिन्नतद्वत्वंव्याप्तिरित्युच्यतेतदासामानाधि[illegible]रण्यस्याव्या
प्यवृत्तितापक्षेपिनदर्शितदोषनिरासःसंभवति सामानाधिकरण्यधर्मावच्छिन्नमहाकालवृत्तित्वाभावेह

१५९ त्रिमत्त्वानवच्छिन्नवृत्तिकत्वविरहेण लक्षणाघटकत्वात् हेतुतावच्छेदकसंबंधेन यस्य यदधिकरणं तदवच्छेदे
न तद्वृत्तित्वं किंचिदवच्छिन्नत्वोभयाभाववत्तायां [illegible]भाववत्कूटवद्वृत्तित्वाभावः अन[illegible]च्छिन्नतद्वृत्तित्वं
व्याप्तिरस्तु अन्यतेतदा सामानाधिकर[illegible]व्याप्यवृत्तित्वेन कश्चिद्दोषः समानाधिकरणधर्मावच्छिन्नसद्वा
कालवृत्तित्वाभावे किंचिदवच्छिन्नत्वसत्त्वेपि कालिकसंबंधेन घटाधिकरणखंडकालावच्छेदेन घटाद्यवृत्तित्वा-
सत्वेनोभयाभाववत्तायाः अक्षतत्वात् सद्वाकालान्यत्वसाध्यके व्यभिचारिणि तादृशाभावस्य लक्षणाघटकत्वेना
तिव्याप्तिविरहात् समानाधिकरणधर्मावच्छिन्नत्वगर्भत्वं मूलकत्वाद्यभावस्य घटादौ कपालाद्यवच्छेदेन वृत्तेः
संयोगादिना ह्रदाद्यधिकरणं तदवच्छेदेन घटादावृत्तेर्निरुक्तोभयाभावत्वविरहात् वह्निमान् धूमादित्या
दौ न लक्षणाघटकता अपि तु अवच्छिन्नत्वविरहेणोभयाभाववतो व्यधिकरणधर्मावच्छिन्नतदभावस्यैवेत्या- १५९
व्याप्यत्वानवकाशादिति ध्येयं सामानाधिकरण्यस्य व्याप्यवृत्तित्वे हेतुतावच्छेदकसंबंधेन यत्किंचित्पदार्थाधि

करणवृत्तयोपावंतत्र । गुणाभावकूटाधिकरणवृत्तित्वनिरूपकत्वाभावाद्यदधिकरणत्वावच्छेदेनैव वर्त्त-
तेतत्त्वमिति वक्तव्यं महाकालवृत्तित्वनिरूपकत्व । समानाधिकरणधर्मावच्छिन्नाभावः खंडकालवृ-
त्तिः साध्यनाधिकरणमहाकालेनास्तीति नोक्तातिव्याप्त्यवकाशः मद्धेतौ तादृशगुणाभावकूटाधिकरणजग-
द्वृत्तित्वनिरूपकत्वस्य व्यधिकरणधर्मावच्छिन्नाभाव एव हेतुतावच्छेदकसंबंधेन किंचिदधिकर ॥ वृत्तिः स-
त्वहेत्वधिकरणसामान्य एव वर्त्तत इति लक्षणसमन्वय इति कृतं पल्लवितेन । मूले प्रतियोग्यवृत्तिश्च ध-
र्मो न प्रतियोगितावच्छेदक इति व्यधिकरणधर्मावच्छिन्नाभावनिराकर्तुः प्रतिज्ञावाक्यं धर्मत्वमनु-
पादेयं अवृत्तेरपि प्रतियोगितावच्छेदकत्वस्य निराकर्त्तव्यत्वात् तत्वे साधकाभावादिति दिक् कृत्स्नः पक्षता-
वच्छेदकप्रतियोग्यवृत्तित्वशरीरे साध्यतावच्छेदकेन सामान्यतः प्रतियोगिप्रतियोगितयोर्न प्रवेशः सर्वेषा यो-
मेव किंचिदभावे प्रतियोगिनि संबद्धतया किंचिदभावप्रतियोगितावच्छेदकतया च विशिष्टपक्षाद्यप्रसि-

द्वेः किंतु विशिष्यवाच्यत्वत्वादिना तथात्ववाच्यत्वाद्यवृत्तित्वावच्छिन्नेवाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं
साधनीयं सम्भूद्गालंबनानुमितिरुद्देश्या तदभावीयप्रतियोग्यवृत्तित्वावच्छिन्नतत्तदभावप्रतियोगितानव
च्छेदकत्वसाधनं न सम्यक् समनियताभावैक्यमते समवायित्वादिना वाच्यत्वाद्यभावस्य घटत्वाद्यवच्छिन्न
पटाद्यभावाभिन्नतया समवायिपटादीनामपि तथाविधवाच्यत्वाद्यभावप्रतियोगितया तद्वृत्तिसमवायित्वा
देर्वाच्यत्वाद्यभावीयप्रतियोग्यवृत्तित्वाया दुर्घटत्वात् प्रतियोगिताः विशिष्योपादाय तत्तत्प्रतियोगितावदवृ-
त्तित्वावच्छिन्नतत्तत्प्रतियोगितावच्छेदकत्वाभावसाधनमपि द्वेयं वाच्यत्वादिनिष्ठायाः प्रसिद्धसमानाधिकर
णद्वित्वाद्यवच्छिन्नाभावप्रतियोगितया उपादाने सिद्धसाधनात् सोदृढोपाध्यायैरपि अधिकरणसमवायि
त्वादिधर्मस्य सामानाधिकरण्यद्वित्वाद्यवच्छिन्नप्रतियोगितावच्छेदकत्वानंगीकारात् अधिकरणधर्मावच्छि
न्नायाश्च प्रतियोगिताया उभयवाद्यसिद्धतया विशिष्योपादानसंभवात् केचित्तु विशिष्य समवायित्वत्वादि- १६०

९९ वं पक्षतावच्छेदकीकृत्य वाच्यत्वादिनिष्ठप्रतियोगितानवच्छेदकत्वं साधनीयं तादृशप्रतियोगितावदवृत्तित्व
मेव हेतुः यो यदवृत्तिः स तन्निष्ठप्रतियोगितानवच्छेदक इति सामान्यतो व्याप्तिप्रदर्शकः प्रतियोग्यवृत्तिश्चेति
ग्रंथः वीप्साद्यभावेपि प्राथम्येन व्याप्तेर्लाभसंभवात् वाच्यत्वाद्यवृत्तिधर्ममात्रस्यैव व्यधिकरणतया वाच्यत्वादि
निष्ठप्रतियोगितायां यन्मतेवच्छेदकतया यद्यप्यत्रान्वयदृष्टांतदुर्लक्ष्यं तथापि व्यतिरेकेन वाच्यत्वादिनिष्ठोभय
त्वादिकमेव दृष्टांतः संभवतीत्यदोषः अथ वा यो यदवृत्तिः स तदनवच्छेदक इति सामान्यव्याप्तौ कारणत्वादिव्य
धिकरणः घटत्वादिः कारणतावच्छेदकत्वे एवान्वयेन दृष्टांतः प्रतियोगितावच्छेदकत्वविषयतावच्छेदकत्वोभ
यसाधारणावच्छेदकतात्वस्यैकोभ्रमविषयताव्यधिकरणे तदवच्छेदकगततात्वादावुक्तसामान्यव्याप्तेर्भंगवा
रणाय विषयतान्यत्वेन यसदायोविशेषणीय इत्याहुः अथ कालिकसंबंधेन पटादिवृत्तिघटत्वादेः समवाया ९९
दिना पटादिनिष्ठप्रतियोगितावच्छेदकत्वखंडनाय तत्तत्संबंधेन प्रतियोग्यवृत्तित्वं तत्तत्संबंधेन प्रतियोगितावच्छे

१६२ दकपालद्वेतुतया वा विवक्षणीयं तथाच समवायादिसंबंधेन वाच्यत्वादिवृत्तित्वाप्रसिद्धोक्तरीत्या समवायादिसं
बंधेन घटत्वाद्यवच्छिन्नवाच्यत्वाद्यभावखंडनानुपपत्तिः नच प्रतियोग्यवृत्तित्वनियमेन प्रतियोगिनिष्ठावच्छेदक
ताघटकसंबंधावच्छिन्नाभावप्रतियोगित्वमेव विवक्षणीयं तथाच घटत्वादेर्वाच्यत्वादिनिष्ठसमवायादिसंबंधाव
च्छिन्नाभावप्रतियोगितयानाप्रसिद्धिरिति वाच्यं अव्याप्यवृत्तेः संयोगाभावप्रतियोगितावच्छेदकस्य प्रतियो
गिनिष्ठाभावप्रतियोगितयोक्तधर्मस्य पक्षतावच्छेदकत्वे बाधस्य हेतुत्वे च व्यभिचारस्य दुर्वारत्वात् प्रतियोगिनि
ष्ठत्वे दप्रतियोगितायामवच्छेदकताघटकसंबंधेनावच्छेदकत्वस्य विवक्षणे व्यधिकरणसंयोगादिसंबंधेन घटत्वात्वं
द्यवच्छिन्नवाच्यत्वाद्यभावनिराकरणानुपपत्तिः तेन संबंधेन घटत्वादेरभेदप्रतियोगितायामवच्छेदकत्वास्यवादिनो
रननुमतत्वात् एवं घटत्वादौ समवायादिसंबंधेन वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वस्याभावः प्रतियोग्य
प्रसिद्ध्या साधयितुमशक्यः मैवं स्वप्रतियोगिकत्व यदनुयोगिकत्वोभयाभाववत्पावृत्तिसंबंधसामान्यकोयः १६२

पूर्वस्वपदोपात्तस्वनिष्ठत्वतत्तत्संबंधावच्छिन्नत्वोभयाभाववन्निष्ठप्रतियोगितावच्छेदकतासामान्यकइत्यर्थः
विवक्षायामेवसामंजस्यात् संयोगादिसंबंधसामान्येघटत्वादिप्रतियोगिकत्वा[illegible]नुयोगिकत्वोभयाभा
वसत्वात्प्रथमस्वपदेनघटत्वाद्युपादानस्यसतद्वयएवसंभवात् तत्रस्वनिष्ठत्वसंयोगादिसंबंधावच्छिन्नत्वोभया
भाववद्वाच्यत्वादिवृत्तिप्रतियोगितावच्छेदकतासामान्यकत्वसाधनेनोद्देश्यसिद्धिः ननुसमवायितयावाच्यत्वंना
स्तीत्याद्याकारकः समवायित्वादेर्वाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वावगाही प्रत्ययएवमानमित्युक्तदूषणोर
सिध्याशंकयाआह तद्विशिष्टज्ञानस्येति अत्रवप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावलौकिक
त्वावच्छिन्नेहेतुत्वान्महानसीयवन्हिर्नास्तीत्यभावबुद्धौमहानसीयत्वाद्यवच्छिन्नत्वेनवन्ह्यादिनिष्ठप्रतियोगिता
वगाहिन्यांयथामहानसीयत्वप्रकारएववन्हित्वाद्यवच्छिन्नविषयकज्ञानंहेतुस्तथासमवायितयावाच्यत्वंनास्ती
त्यादिबुद्धेर्वाच्यत्वादिनिष्ठप्रतियोगितायांसमवायीत्वाद्यवच्छिन्नत्वाद्यवगाहित्वेसमवायित्वादिनावाच्यत्वाद्यव

च्छिन्नधर्मिकं ज्ञानं तथा च त्वा वाच्यत्वेन समवायीति विशेषदर्शनदशायामप्युत्पद्यमान तथाकारा प्रतीतिः कथमुपपा
द्यतां तत्र तस्या वाच्यत्वाद्यनुयोगिकसमवायित्वाभावावलंबनत्वोपगमे सर्वत्र तथात्वमुपेयतामिति गतं व्यधिकरणध
र्मस्य प्रतियोगितावच्छेदकत्वेनेत्यभिप्रायइति मिश्राद्यनुसारिव्याख्यानं तत्रेयमनुपपत्तिरवतरइति तद्धर्मावच्छिन्नतन्नि
ष्ठप्रतियोगिताकाभावबुद्धौ तद्धर्मप्रकारकतज्ज्ञानत्वेन हेतुत्वासंभवः घटत्वेन यत्किंचिद्घटज्ञानादपि यावद्घटप्रतियो
गिकसामान्याभावबुद्ध्युत्पत्त्यापत्तिवारणात् संभवेपि वादर्शितविशेषदर्शनकालेनिधर्मितावच्छेदकवाच्यत्वादिधर्मि
कसमवायित्वादिभ्रमसंभवेन व्यधिकरणधर्मावच्छिन्नाभावप्रतीतिनिर्वाहात् तादृशकारणतायाअकिंचित्करत्वं
तत्तद्वह्नित्वधर्मितावच्छेदकमहानसीयत्वप्रकारकबुद्धेर्विना विशिष्य खलु महानसीयत्वप्रकारकज्ञानसत्त्वेपि महानसी
यवह्नित्वाद्यवच्छिन्नाभावप्रत्यक्षानुत्पत्त्या तद्धर्मसमानाधिकरणतद्धर्मावच्छिन्नप्रतियोगिताकाभावबुद्धौ तद्धर्माव-
च्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानत्वेन हेतुतावच्छेदकतयेति वाच्यत्वतावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानं विमानस- १६२

मवायित्वावच्छिन्नधर्मिकतद्धर्मप्रकारकज्ञानत्वेनहेतुतावाच्येतिवाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञानेवि
ष्यानसमवायित्वावच्छिन्नत्वेवाच्यत्वत्वसमानाधिकरणप्रतियोगिताकाभावज्ञानसंभवइतिवाच्यं महानसीयवन्हित्वा
द्यवच्छिन्नप्रतियोगितायांद्रव्यत्वादेरपिसामानाधिकरण्यादुक्तकार्यकारणभावोपगमेद्रव्यत्वाद्यवच्छिन्नधर्मिक
महानसीयत्वप्रकारकज्ञानस्यापितादृशप्रतियोगिताकाभावबुद्धावपेक्षणीयत्वापत्तेः अथतद्धर्मवद्वृत्तित्वेन
भासमानप्रतियोगित्वेनतद्धर्मावच्छिन्नत्वावगाहिन्यामभावबुद्धौतद्धर्मावच्छिन्नाधर्मिकतद्धर्मप्रकारकज्ञानत्वे
नहेतुतामहानसीयवन्हिनिष्ठस्य तत्तद्व्यक्तित्वावच्छिन्ननिष्ठत्वेनसंसर्गघटकतयाभासमानप्रतियोगित्वेम
हानसियत्वावच्छिन्नत्वंभासते स्वावच्छिन्नव्यक्तिवृत्तिप्रतियोगिताकत्वस्याभावांशेप्रतियोगिविशेषणतापत्तेर्म
हानसियत्वस्यसंबंधघटकत्वादिनितत्तद्व्यक्तित्वावच्छिन्नधर्मिकमहानसीयत्वप्रकारकज्ञानस्यापेक्षानतद्बुद्ध
र्मोत्तरावच्छिन्नधर्मिकस्याधर्मान्तरविशेषितंव्यक्तित्वेनतत्रापिप्रतियोगितायाअभा[illegible]नादितिचेन्नत्वद्दिप्रतियोगि

हृति

१६३ तावच्छेदकप्रकारकज्ञानमंतरेणाप्यभावप्रत्यक्षसामान्यापत्तिः प्रत्यक्षविशेषणत्वहेतुतायाः स्वीकृतत्वात्
एवमप्यनतिप्रसंगेन प्रतियोगिविशेषिताभावबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानमुभयाप्रतियोगिताव
च्छेदकप्रकारकज्ञानस्य हेतुत्वादेव निर्वाहे स्वतंत्रतद्धेतुतानिर्बीजत्वापाताच्च तन्मते तु वैतादृशरीत्यैव हेतुहेतुम
द्भावस्तथापि समवायितया वाच्यत्वं नास्तीत्यत्र वाच्यत्वत्वसामानाधिकरण्यविशेषितस्वावच्छिन्नप्रतियोगिताया
एव समवायित्वसंसर्गघटकतयाभानोपगमसंभवेन वाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वप्रकारकज्ञान
स्य तत्रानपेक्षणीयत्वमुपपद्यत इति अत्रेदं समाधानमवधेयं तदुभयधर्मावच्छिन्नप्रतियोगिताकाभावबु
द्धौ तदुभयैकतरधर्मावच्छिन्नधर्मिकतदितरप्रकारकज्ञानत्वेन हेतुता समवायितया वाच्यत्वाभावस्य तु व्यधिक
रणसामानाधिकरण्ययोः समवायित्ववाच्यत्वत्वयोरुभयोरेव प्रतियोगितावच्छेदकत्वपर्याप्तिरवश्यमंगीकार्या
समवायित्वमात्रस्य प्रतियोगितावच्छेदकत्वे वाच्यत्वत्वप्रकारकज्ञानमंतरेणापि तादृशाभावप्रतीत्यापत्तेः अत्र १६३

समवायितयावाच्यत्वेनास्तीतिप्रतीत्यासमवायित्ववाच्यत्वत्वोभयपर्याप्तप्रतियोगितावच्छेदकत्वानवगा
ह्नेनतस्याःसमवायिवाच्यत्ववदिदमितिभ्रमविरोधित्वानुपपत्तेश्च तंप्रतिसमवायितयाप्रमेयत्ववाच्यत्वोभ
यंनास्तीत्यादिनिश्चयस्याहत्वतदुभयांशेप्रतियोगितावच्छेदकतापर्याप्त्यवगाहित्वनिश्चयत्वेनैवप्रतिबंधकत्वा
त् नचविलक्षणवाच्यत्वप्रकारतानिवेशेनैवदर्शितनिश्चयस्याहत्विसंभवेतदुभयंशेवच्छेदकत्वपर्याप्त्यवगा
हित्वमप्रयोजकमितिवाच्यं यतस्तद्धर्मभावप्रतियोगितावच्छेदकत्वपर्याप्तिस्तदवच्छिन्नत्याभावविरोधित्वप्र
योजिकातदवगाहित्वमेवाभावबुद्धेस्तदवच्छिन्नविशिष्टज्ञानप्रतिबंधकतायांतंत्रंसमवायितयावाच्यत्वप्रमे
यत्वोभयंनास्तीबुद्धेःसमवायित्ववाच्यत्वोभयविशिष्टवत्ताबुद्ध्यप्रतिबंधकत्वेउभयांशेतत्रावच्छेदकतापर्याप्ति
नवगाहित्वमेवबीजं तस्यचसमवायितयावाच्यत्वंनास्तीतिधीसाधारण्येनतस्याएवप्रतियोगिताहत्वाधीःप्रति
बंधकत्वं नतत्कोभयाभावबुद्धेरितिविशेषणएवनोपपद्यते यदित्वनस्याःप्रतीतेःप्रतिबंधकत्वंनास्याद्सत्त्रवि

१६४ षयितावैचित्र्यमात्रंबीजमास्थीयतेतदासमानाधिकरणधर्मावच्छिन्नाभावविषयिण्याघटोनास्तीत्यादिबुद्धे-
रपिप्रतियोगितावच्छेदकत्वावगाहित्वंविभीयतां मद्वितत्रघटत्वादिविशिष्टधीप्रतिबंधकत्वानुरोधमंतरेण
युक्त्यंतरंपरिस्फुरति सच्चभवतामकिंचित्करएवकपालसमवेतद्रव्यंनास्तीनीलघटोनास्तीत्यादिप्रतीतिव्या
वृत्तप्रकारतानिविशेषस्यैवतादृशप्रतिबंधकताबीजसंभवात् तथाचतत्रैवसमवायितयावाच्यत्वंनास्तीत्यादि
त्वाधिकरणधर्मावच्छिन्नाभावबुद्धावपिवाच्यत्वत्वांविशेषप्रतियोगितावच्छेदकत्वावगाहनेनशक्यापह्नवमेवेति
वाच्यत्वत्वाद्यवच्छिन्नधर्मिकासमवायित्वादिप्रकारकतानमंतरेणनतत्संभवः अथयत्वत्वाननुगमेनप्रतियो-
गितावच्छेदकभेदेनतत्प्रकारकज्ञानहेतुताभेदस्यावश्यकतयामहानसीयत्ववह्नित्वादिरूपसमानाधिक
रणधर्मावच्छिन्नाभावप्रत्यक्षंप्रतिएकधर्मावच्छिन्नविशेष्यकापरधर्मप्रकारकज्ञानत्वेनहेतुतावाच्यानतु
व्यधिकरणसमवायित्वसमानाधिकरणवाच्यत्वत्वाद्युभयधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षंप्रतिसम- १६४

वायित्वादिप्रकारज्ञानत्वेन क्लृप्तकारणतयैव तन्निर्वाहादिति चेन्न प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगि
तावच्छेदकत्वमभावप्रतीत्याद्यवगाह्यते न तु स्वातन्त्र्येणेति नियमेन समवायिवाच्यत्वं नास्तीत्याद्याकारिकाया
एवमधिकरणधर्मावच्छिन्नाभावप्रतीतेरुपगन्तव्यतया समवायित्वविशिष्टवाच्यत्वत्वावच्छिन्नवैशिष्ट्यावगाहिन्यां
तादृशबुद्धौ च वाच्यत्वं समवायीति विशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्यापेक्षितत्वेन विशकलितसमवायि
त्वादिप्रकारकज्ञानदशायां तादृशाभावप्रत्यक्षस्यानुत्पत्त्या तदानीं तदापत्तिवारणाय तादृशाभावप्रत्यक्षेऽपि वाच्यत्व
त्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानस्य हेतुतया आवश्यकत्वादिति चेदत्र च विशिष्टवैशिष्ट्यबोधं प्रति विशे
षणतावच्छेदकप्रकारकधीर्हेतुत्वमनङ्गीकुर्वतां घटत्वादिनिर्विकल्पकाद्घटो नास्तीत्यादिप्रत्यक्षस्यापि निर्धर्मितावच्
छेदकसमवायित्वादिप्रकारकज्ञानादपि समवायित्वाद्यवच्छिन्नवाच्यत्वाद्यभावविषयकस्य समवायितया वाच्यत्वं।
नास्तीत्यादिप्रत्ययस्योपगमसम्भवात् वाच्यत्वत्वाद्यवच्छिन्नधर्मिकसमवायित्वादिप्रकारकज्ञानत्वेन प्रतियोगिता।

तस्याभावप्रत्यक्षहेतुतानसिध्यतिइतिविशिष्टवैशिष्ट्यबोधेविशेषणतावच्छेदकप्रकारकज्ञानहेतुतायत्नमाश्रित्यै
वमुक्तरीत्यासाभावेलौकिकत्वावच्छिन्नहेतुभूतप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणबाधपरत
यामूलंव्याख्येयं तथाचजन्यतायाअभावविषयकत्वावच्छिन्नत्वमनिरुक्त्यविशेषणतावच्छेदकविशिष्टविशेषण
ज्ञानस्याविशिष्ट्यबोधत्वावच्छिन्नाभावधीनिष्ठजन्यताप्रतियोगिभूतस्याभावेनसमवायितयावाच्यत्वंनास्तीत्यादि
प्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावत्वादिनासंभवइत्यर्थपरतयातद्व्याख्यानमेवोचितं ननुविशिष्टवैशिष्ट्यबो
धहेतुताउपजीव्यकव्याप्यहेतुत्वांतरपरतयेत्याशयेनाह दीधितौविशेषणतावच्छेदकेति अयंभावः वाच्यत्वंसम
वायीतिज्ञानमंतरेणसमवायिवाच्यत्ववानयमितिविशिष्टवैशिष्ट्यबोधानुत्पत्त्यावाच्यत्वत्वावच्छिन्ननिरूपितत्वे
नभासमानवैशिष्ट्येसमवायित्वावच्छिन्ननिरूपितत्वावगाहिज्ञानेवाच्यत्वत्वावच्छिन्नधर्मिकसमवायित्वादि
प्रकारकज्ञानत्वेनहेतुताकल्पनमावश्यकंसमवायितयावाच्यत्वनास्तीतिव्यधिकरणधर्मावच्छिन्नाभावबुद्धेर १६५

पिवाच्यत्वत्वावच्छिन्नीयत्वे तन्मासमानेऽनुयोगितास्वरूपवैशिष्ट्ये समवायित्वावच्छिन्नीयत्वागाहितयातत्रता
दृशाज्ञानमवश्यापेक्षणीयमिति ननु वैशिष्ट्यं तेवाच्यत्वत्वनिष्ठधर्मितावच्छेदकतानिरूपकविशेषणतापन्न
समवायित्वावच्छिन्नप्रतियोगिताकत्वावगाहिबुद्धावेव तदवच्छिन्नधर्मिकसमवायित्वप्रकारकत्वानं हेतुः व्यधि
करणधर्मावच्छिन्नाभावबुद्धौ च वाच्यत्वत्वावच्छिन्ने समवायित्वस्य विशेषणत्वं नोपपद्यते अपि तु तद्विशेषणता
पन्नस्यैव तस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे विशेषणत्वमुपपद्यते वाच्यत्वसंसर्गतावच्छेदक
तयैव वा तथाविधतदवच्छिन्नत्वस्य प्रतियोगितांशे भानमुपपद्येते तथा च तत्र नोपदर्शितज्ञानापेक्षेत्याशंक्य
परीजिहीर्षुर्नावं व्याचष्टे अभावप्रत्यये हीति विशेषणस्य प्रतियोगिनिरूपितविशेषणतापन्नस्य घट
त्वादेः प्रतियोगितावच्छेदकत्वमवगाहते प्रतियोगितयाभासमानघटादिनिरूपितविशेषणतावच्छिन्ना
यास्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नाघटत्वादिनिष्ठप्रकारतातच्छालीनवतीतियावत् ननु स्वातंत्र्ये

णप्रतियोग्यविशेषणत्वेन घटत्वादेः प्रतियोगितावच्छेदकत्वमवगाहत इत्यनुषंगेणान्वयः तादृशासंबंधावच्छि
न्नघटत्वादिनिष्ठप्रकारताप्रतियोगिनिरूपितप्रकारतानवच्छिन्नानभवतीत्यर्थः घटो नास्तीत्येवेति अभा
वांशे स्वातंत्र्येण घटत्वादिवैशिष्ट्योल्लेखरहिताया एवेत्यर्थः प्रतीतेरनुभवादिति शेषः एतावता किमायात
मित्यत आह तदिद्धेति अवच्छिन्नं विशेषितं तस्यापि प्रतियोगितावच्छेदकत्वं तस्य प्रतियोगितावच्छेद
कत्वमपि तथात्वमानाभावेन न व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वसिद्धिरिति भावः अथ व्यधिक
रणधर्मस्य प्रतियोगिविशेषणतयैव व्यधिकरणधर्मावच्छिन्नाभावबुद्धेर्मानमुपेयते नन्वेवं मतितादृशबु
द्धेः समवायित्वादिरूपविशेषणतावच्छेदकप्रकारकवाच्यत्वादिज्ञानजन्यतावच्छेदकाक्रांततया तादृशज्ञानं
विना व्यधिकरणधर्मावच्छिन्नाभावबुद्ध्यनुत्पत्तिरिति वाच्यं भ्रमात्मकतादृशज्ञानदशायामेव तद्बुद्ध्युपग
मात् विशेषदर्शनदशायामप्याहार्यतत्प्रकारकज्ञानादेव तद्बुद्धिसंभवात् अनाहार्यमेव विशेषण। १६६

तावच्छेदकप्रकारकज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययपक्षे तु तेर्विशिष्टदर्शनकालीनायाः समवायितया वाच्य
त्वं नास्तीत्यादिबुद्धेरनुपपत्त्या वाच्यत्वाद्यधिकरणकसमवायित्वाद्यभावावगाहित्वमुपेयते वाच्यत्वं समवायीत्या
दिभ्रमानन्तरं समवायितया वाच्यत्वं नास्तीत्याकारकप्रत्यय एव व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वेमा
नमात्रांतत्र तदवगाहितायाः सर्वानुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् तादृशप्रतीतेर्वाच्यत्वे समवायित्वा
भावावगाहित्वोपगमे तु सूर्वं वाच्यत्वं समवायीति भ्रमापेक्षानुपपत्तेरित्याशयेनाशंकते अथ तदवगाहि इति
समाधत्ते तर्हि भ्रमएवेति व्यधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वांशेऽपि भ्रम एवेत्यर्थः वैशिष्ट्यभावएवा
वच्छेदकताया ज्ञानादप्यावच्छेदकतायां वैशिष्ट्यनियततया बाधे तस्या अपि बाधादिति भावः नन्वेवं गवि शशशृंगं
नास्तीति प्रतीतेरसिद्धेरिति मूलासंगतिः तादृशप्रतीतेः शृंगांशे शशीयत्वावगाहित्वानभ्युपगमे शशीयत्वे शृंग
निष्ठप्रतियोगितावच्छेदकत्वावगाहनासंभवात् तदवगाहित्वे भ्रमत्वमनुभव यथापि व्यधिकरणधर्मावच्छिन्नाभावा

१६७ साधकत्वात्तादृशप्रतीतिनिराकरणस्यानुपयुक्तत्वादिति वाच्यं अभ्रान्तानामपि गविशशगंनास्तीतिव्यव
हारमूलप्रतीतिसत्त्वे नोक्तनियमस्यैवासिद्ध्याव्यधिकरणधर्मावच्छिन्नभावसिद्धिनिष्ठसूद्देवातादृशप्रतीतेर्गो
शृंगाधिकरणकशशीयत्वाभावावगाहित्वोपगमे तस्या गवाधिकरणकाभावावगाहितानुभवविरोध इत्या
शंकामुत्थाप्याभ्रान्तपुरुषीयगवाधिकरणकाभावावगाहितादृशप्रतीतिनिराकरणपरतयातद्ग्रन्थस्या
वतारणीयत्वात् ननुकुभ्रान्तानांगविशशशृंगंनास्तीतिप्रतीतिर्मास्तु शशशृंगंनास्तीतिप्रतीतिर्नापन्हो
तुंशक्यते सर्वेषामेवतथाविधव्यवहारदर्शनादित्याशंकायांशशशृंगंनास्तीत्यादिमूलावतारो बोध्यः य
द्यपिशशशृंगंनास्तीतिशब्देनशशशृंगाभावइत्याकारकः शाब्दबोधो नशक्यतेजनयितुं अनुयोगिवाचक
दोत्तरंसप्तमीविरहेणनिराकांक्षत्वात् तथापिपदार्थोपस्थित्यादिमूलतादृशमानसबोधजननेच्छयाप्युत्पन्ना
नांतथाप्रयोगइत्याशयः ननुघटत्वेनघटोनास्तीत्याकारकस्याभावप्रत्ययस्यानुभावीकतयाप्रतियोगिविशे १६७

षणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमभावप्रत्ययोऽवगाहते इति न नियमः तादृशप्रतीत्या स्वातंत्र्येण भासमा
नेघटत्वे प्रतियोगितावच्छेदकत्वावगाहनात् अन्यथा घटत्वेनेत्याकारकतानुपपत्तेः तथा च घटत्वेन पटो ना
स्तीत्यादावपि घटत्वादौ पटादिनिष्ठप्रतियोगितावच्छेदकत्वावगाहनं निराबाधमेवेति व्यधिकरणधर्मावच्छिन्ना
भावसिद्धिर्निष्प्रत्यूहैव न च तत्र अधिकरणधर्मस्यावच्छेदकत्वावगाहनसंभवेऽपि अतिरिक्ताभावकल्पनागौरव
भयेन तादृशप्रतीतेः पटाद्यधिकरणघटत्वाद्यभावावगाहित्वमेव स्वीक्रियत इति वाच्यं असति बाधके तदु
ल्लेखिप्रतीतेस्तदुल्लेख्यप्रतियोग्याद्यर्थविषयकत्वापरित्यागात् पटाद्यधिकरणकघटत्वाद्यभावस्य च घटत्वेन पटो ना
स्तीत्यादिशाब्दात् कथमप्यप्रतीतेः प्रतीतिबलात् तत्पदार्थसिद्धौ तत्पदार्थकल्पनागौरवस्य फलमुखत्वेनाबाधक
त्वात् न च प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपकारणबाधेन तादृशप्रतीतेर्व्यधिकरणधर्मावच्छिन्ना
भावावगाहित्वं न संभवतीति युक्तं घटत्वावच्छिन्नधर्मिकघटत्वादिप्रकारकज्ञानत्वेन प्रतियोगिज्ञानहेतुतायां मा

१६८ नाभावात् तादृशज्ञानं विनैव घटत्वेन पटो नास्तीत्याद्याकारकस्य घटत्वादिविशिष्टपटादिवैशिष्ट्यानवगाहिनो
भावप्रत्यक्षस्य स्वीकारात् वस्तुतस्तु कुत्राप्यभावबुद्धौ स्वातंत्र्येण प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य
हेतुता नास्ति न च तदकल्पने प्रतियोगिज्ञानशून्यकाले नास्तीत्याकारकप्रतियोग्यविषयकाभावप्रत्यक्षस्य
घटत्वादिनिर्विकल्पकानंतरं विशेष्ये विशेषणमिति रीत्या घटाभावप्रत्यक्षस्य चापत्तिरिति वाच्यं प्रतियोगि
ज्ञानहेतुतामतेपि अभावे प्रतियोगितया घटादिरूपप्रतियोगिज्ञानविरोधिबाधादिग्रहसत्वे प्रतियोग्यवि-
षयकाभावग्रहापत्तेर्दुर्वारत्वात् यदि च निरुधर्मितावच्छेदकप्रतियोगिज्ञाने बाधकाभावात् प्रतियोग्यविषय
काभावप्रसयो नापादयितुं शक्यते तथापि तादृशबाधदशायां प्रतियोगिधर्मितावच्छेदकतानापन्नाभाव
त्वप्रकारकस्य स्वातंत्र्येण प्रतियोगिविषयकस्य नास्ति घटीयश्च साक्षात्कारकसमूहालंबनप्रत्यक्षस्यापत्तिः एवं
घटत्वावच्छिन्नप्रतियोगिताकाभावस्य यदाभानं तदा निर्विकल्पकोपस्थिति द्रव्यत्वादेर्विशेष्ये विशेषणमिति १६८

रीत्याघटाद्यंशेभानापत्तिः कारणबाधेन न शक्यते वारयितुं तादृशाभावस्य इदन्त्वावच्छिन्नप्रतियोगिता-
कत्वविरहेण तद्भावे इदन्त्वादिप्रकारकज्ञानस्यानपेक्षणात् यदि च यादृशप्रकारतावच्छिन्नधर्मे स्वावच्छिन्नप्रति
योगिताकत्वसंबंधावच्छिन्नधर्म्यंतरनिरूपितप्रकारतातदन्यप्रकारतानिरूपितविशेष्यतापन्नविशेषणविष
यतानिरूपितसंसर्गतासंबंधेन भानं प्रति तदभावीयानुयोगिताविशेषभेदस्य कारणतां कल्पयित्वा ईदृ
शापत्तिः प्रतियोगिप्रकारतानिरूपितधर्मितावच्छेदकतापन्नादृतिप्रकारतानाविशेषसंबंधेन लौकिकप्रत्य
क्षं प्रति तदभाववत्त्वभेदस्य कारणतां कल्पयित्वा पूर्वापत्तिर्वार्यते तदा नावतेवमकलापत्तिवारणादृत्वं प्रतियोगि
ज्ञानहेतुतया नन्वेवमपि प्रतियोग्यविषयस्याभावप्रकारकप्रत्यक्षस्यापत्तिर्विना प्रतियोगिज्ञानहेतुतां न
शक्यते वारयितुमिति वाच्यं प्रतियोगिज्ञानं विना प्रतियोग्यविषयकस्येदंत्वादिनाऽभावप्रत्यक्षस्य इदंत्वा
दिरूपतादृशविशेषणज्ञानासत्त्वे च तादृशाभावनिर्विकल्पकस्येष्टत्वात् अभावनिर्विकल्पकानभ्युप
गमे प्रतियोगिज्ञानहेतुतयापि तद्वारणसंभवात् इदंत्वादिनाऽभावप्रत्यक्षेऽव्यभिचारणायाभावत्वप्र-

१६९ कारकाभावप्रत्यक्षं प्रतीव प्रतियोगिज्ञानस्य हेतुतया वाच्यत्वात् विशेषणतानवच्छिन्नविषयतासंबंधेनप्रत्यक्षं
प्रतिअभावभेदस्य हेतुत्वास्वीकृत्य तद्वारेणैवसमापितस्य तथैव वारणीयत्वात् वस्तुतस्तु अपाद्यप्रसिद्ध्यैव।
तादृशफलापत्त्यनवकाशः प्रसिद्धाया घटो नास्तीत्यादिबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र प्रतियोगि
तावच्छेदकघटत्वादिप्रकारकज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविधया हेतुतयाः तत्सत्वात्तादृशका
रणविरहादेव न तच्छून्यकाले तदापत्तिः यत्तु अनाहार्यप्रतियोगितावच्छेदकविशिष्टप्रकारकोपलंभविरहो वि
शेषितस्तद्धर्मिप्रत्यासन्नाभावग्रहे हेतुः तथा च यस्य पुंसः समवायित्वादिविशिष्टवाच्यत्वादिप्रकारको नाहा
र्यभ्रम प्रसिद्धस्तदीयः समवायितया वाच्यत्वं नास्तीत्याकारक प्रत्ययोनव्यधिकरणधर्मावच्छिन्नाभावमवा
गाहितुमिष्टे तदीय तादृशप्रतियोग्युपलंभविरहरूपतदीयाभावप्रत्यक्षकारणस्याप्रसिद्धेरितितत्पुरुषी
यतादृशप्रत्ययस्य वाच्यत्वाद्यनुयोगिकसमवायित्वाद्यभावविषयत्वावश्यकत्वेनैकासर्वत्रैव तद्विषयकत्वमु
चितम् एकप्रकारप्रतीते पुरुषभेदेन विषयतावैचित्र्यविरहादिति मिश्रोक्तव्यधिकरणधर्मावच्छिन्नाभावनि। १६९

राकरणपंथाः सोपि न साधीयान् अभावबुद्धौ स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनउपलंभाभाव
त्वेन एककारणतायाः स्वत्वाननुगमेन दुर्वचतया विशिष्यकारणताकल्पनस्यावश्यकत्वे यत्र तादृशोपलंभा-
प्रसिद्धिस्तत्रैव तादृशोपलंभानंतरमभावप्रत्ययवारणाय तदभावहेतुतोपगमाद्व्यधिकरणधर्मावच्छिन्नाभा
वबुद्धौ कस्विदप्यप्रसिद्ध तदभावहेतुत्वासंभवेपि सन्निकर्षादिघटितसामग्रीतस्तदुत्पत्तौ बाधकाभावादि-
त्यतआह यद्वि पुनरिति स्वरसवादी वादशून्यः घटत्वेन घटो नास्तीति पाठः घटत्वेन पटो नास्तीति पाठो न
साधुः तादृशप्रतीतेः पटाद्यनुयोगिघटत्वाद्यभावावगाहितायाएव व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगं
तृन्निरुपगमात् प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वं भासत इति नियमस्य तदाकारप्रती
तिबलेनानाश्रयवारणत्वात् आनुभाविक इत्यस्य व्यधिकरणधर्मस्यावच्छेदकत्वावगाहितयानुभवसिद्ध इत्य
र्थकतया वा कथंचित्संगमनीयः गीर्वाणगुरूणामपि न शक्यमित्यनेन प्रतीतिकारणबाधेन तादृशाभावनिराक
रणनिर्भरा मिश्राद्य आदिमाः यदिति तदित्यनेन तादृशप्रतीतिरानुभाविकत्वे विवादं प्रदर्श्य तादृशाभावस्यापार-
मार्थिकत्वं सूचितं इति व्यधिकरणधर्मावच्छिन्नाभावरहस्यं श्रीहरिः ब श्री